MEGHADŪTA

R. D. KARMARKAR

THE
VRAJAJIVAN INDOLOGICAL STUDIES
9

MEGHADŪTA

OF

KĀLIDĀSA

Edited with a Complete Translation into English, Introduction, Notes, Appendices and Extracts from the Commentaries of **Vallabha, Dakṣiṇāvarta and Mallinātha**

by
R.D. Karmarkar
Ex-Principal and Professor of Sanskrit, Sir Parashurambhau College, Poona

CHOWKHAMBA VIDYABHAWAN
VARANASI

Publishers :

CHOWKHAMBA VIDYABHAWAN
(Oriental Publishers & Distributors)
Chowk (Behind Bank of Baroda Building)
Post Box No. 1069
Varanasi 221001
Tel. # 0542-2420404
e-mail : cvbhawan@yahoo.co.in

Third Edition, Varanasi 2009
Price Rs. Rs. 100.00
ISBN : 81-7084-174-0

Also can be had from :

CHAUKHAMBA SURBHARATI PRAKASHAN
K. 37/117, Gopal Mandir Lane
Post Box No. 1129, Varanasi 221001

CHAUKHAMBA SANSKRIT PRATISHTHAN
38 U.A. Bungalow Road, Jawahar Nagar
Post Box No. 2113, Delhi 110007

CHAUKHAMBA PUBLISHING HOUSE
4697/2, Ground Floor, Street No. 21-A
Ansari Road, Darya Ganj, New Delhi 110002

Printed at:
Ratna Offsets Ltd.
Varanasi

DEDICATED

to the

Sacred Memory

of my

Sahadharmacārinī

Saubhāgyavatī

INDIRĀBĀI KARMARKAR

(*Died 28th October, 1937*)

[It is true

न खलु स उपरतो यं जनः स्मरति

Still

कथमत्यन्तगता न मां दहेः ।]

ACKNOWLEDGEMENT

We are thankful to Prof. M.G.Dhadphale, the honorary Secretary to Bhandarkar Oriental Research Institute, Pune for extending his humble co-operation for the publication of this book. We are also thankful to Dr. Vasudeo Laxman Manjul for his kind co-operation to bring out this book. At last but not the least, we are thankful to Mrs. Sheela Karmarkar and Mr. Rajshekhar Prabhakar Karmarkar for their assistance regarding the publication of this book.

PREFACE

This edition of the Meghadūta is prepared on the same lines (heartily approved of by all concerned, and imitated by other editors) as those of my editions of other Sanskrit texts. The English Translation of the entire text has been printed just below it for ready reference. The Translation has been made as literal as possible. Words for which there were no equivalents in the original, but which were added to make the sense of the text complete or clearer, are put in rectangular brackets. Original Sanskrit words, which are more or less out-of-the-way, or which are somewhat freely rendered, or to the renderings of which attention is intended to be drawn, are enclosed in parenthesis. In the Notes all points which an ordinary student requires to be explained are explained. Besides, information on general topics is occasionally given. My efforts are directed towards the goal of making the student understand his text and appreciate his author. I have no doubt by the use of this book the student would be able to achieve both these objects. A special feature of the edition is that interesting extracts from the three well-known old commentators Vallabha, Dakṣiṇāvarta and Mallinātha, have been given, which the student would do well to study carefully.

I must express my great indebtedness to the Trivandrum and Shrirangam editions of the Meghadūta containing respectively the commentaries of Dakṣiṇāvarta and Pūrṇasarasvatī. I have also occasionally made use of the printed editions of the poem. Lastly, I offer my hearty thanks to the Managers of the Aryabhushan Press, for their promptness and courtesy.

28th June 1938
S. P. College,
POONA 2.

R. D. Karmarkar

Preface to the Second Edition

No material changes are made in this Edition. A map of India, showing roughly the course of the cloud is given for the benefit of the students. Miss Shyama Deodhar, Miss Sarala Karmarkar, Miss Usha Karmarkar and Master Prabhakar Karmarkar readily undertook the task of preparing the map, for which my thanks are due to them.

1st August 1947
Damodar Villa,
Poona 4.

R. D. Karmarkar

CONTENTS

Abbreviations used

D — Dakṣiṇāvarta
Gītā — Bhagavadgītā
Kumāra — Kumārasaṁbhava
M — Mallinātha
Mālatī — Mālatīmādhava
Raghu — Raghuvaṁśa
Śāk — Śākuntala
Uttara — Uttararāmacarita
Vikram — Vikramorvaśīya

INTRODUCTION

1 Meghadūta : Contents

The Meghadūta is perhaps the most well-known and widely read work of Kālidāsa. It is a small poem (containing about 120 stanzas) and has no plot or story as such. A certain Yakṣa cursed by his master Kubera is forced to make his stay on the Rāmagiri (near Nagpur) for a year in exile, away from his wife. On the first day of Āṣāḍha, he notices a cloud on the mountain and at once thinks of making use of the Megha as a dūta (messenger) to send a message to his wife at Alakā (on the Kailāsa). The Yakṣa then describes in detail the path the cloud should follow from Rāmagiri to Alakā (Detailed interesting descriptions of countries, cities, rivers, hills etc. on the way are given). Then comes the description of Alakā, Yakṣa's mansion and wife, and last comes the message proper.

The poet himself has divided the poem into two parts—the first describing the path, and the second the message proper.[1] Popularly the two parts of Meghadūta are called the Pūrvamegha and the Uttaramegha, the former ending with the description of the route up to Alakā (Stanzas 1-65) and the latter describing Alakā and the message (Stanzas 66–117)

The following is a detailed summary of the poem.

Stanzas 1–15 :— These form an introduction to the poem. The Yakṣa sees the cloud on the Rāmagiri, flatters him by calling him the प्रकृतिपुरुष of Indra and requests him to take his message to his wife. It was something quite in the line of the cloud, for was it not the business of the cloud to relieve the ताप of the संतप्त? The cloud again was to go to the celebrated Alakā hallowed by the presence of Siva. Incidentally, he would have an opportunity of relieving the distress of travellers' wives by forcing their husbands to give up their travels and to go back to their homes. The gods

---

(1) मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
संदेशं मे तदनु जलद श्रोष्यसि श्राव्यबन्धम् ॥ Stanza 13

also expected the cloud to comply with the Yakṣa's request, for there were good omens all round, like the favourable breeze blowing, the Cātaka cackling on the left, the appearance of the rain-bow from the वल्मीकाग्र etc. The cloud's journey also would be pleasant enough, because he would be greeted by the Balākās and accompanied by the royal swans on the way, and the cloud would be directed to go by a route, where the minimum of inconvenience and the maximum of pleasure and enjoyment would be ensured.

[The cloud's troubles would not be taken in vain, for the Yakṣa expects his wife to be alive when the cloud would reach her, being fortified by the tie of hope of reunion at the end of the curse-period].

Stanzas 16-65 :—The route to be followed by the cloud, with the distinctive peculiarities of the halting places on the way is described as follows :—

(1) Māla

(1) He should first all ascend the **Māla** (Malda near Ratanpore or the table-land near by). [Here the rustic ladies would be wistfully looking at the cloud, full of heart-felt gratitude, for their agricultural prosperity entirely depends upon the cloud.]

(2) The Āmrakūṭa

(2) The cloud then should first move to the west and then to the north. He should ascend the **Āmrakūṭa** mountain (Amarakaṇṭaka or preferably the Mahadev Hill). [Here he could do a friendly service to the mountain by quenching the forest-fire, and would be quite pleased to see plenty of ripe mango-fruit all over, and the bowers of creepers used as rendezvous by the foresters.]

(3) The Narmadā

(3) He would then come across the **Narmadā** at the foot of the **Vindhya** mountain, and would be reminded of a lover's quarrel ending with the lady falling at the feet of her lover. [He would meet wild elephants and thickets of Jambū fruit there. Thence he would go over regions where the Kadamba trees have put forth buds and groves of plantain-trees abound, and would meet his friends, the peacocks.]

(4) The cloud would then pass through **Daśārṇa** (the छत्तीसगड district in Malwa). [Here he would meet the swans, and come across regions of Jambū thickets and abundant Ketakī flowers.]

(4) Daśārṇa country.

(5) He would then reach the Daśārṇa capital **Vidiśā** (modern Bhilsā) on the banks of the **Vetravatī** (modern Betwa). [The cloud could flirt with the Vetravatī there.]

(5) Vidiśā on the (5A) Vetravatī river.

(6) There he should take rest on the **Nīcaiḥ** hill (a small hill near Bhilsā). [The Kadamba trees would be in full blossom and the hill would be found patronised in large numbers by the gallants of Vidiśā.]

(6) The Nīcaih hill.

(7) The cloud would then meet the **Vananadī** nearby. [Here the Jasmine creepers would be abounding and lots of flower-plucking women would be glad to see the cloud affording shade to them.]

(7) The Vananadī river.

(8) The cloud then should proceed by a longer and circuitous route, for he must not miss Ujjayinī at any cost. He would then meet the **Nirvindhyā** river. [The waters would be full of eddies and birds and the river would be coaxing the cloud to stay with her.]

(8) The Nirvindhyā river.

(9) Next, he would meet the **Sindhu** river (Kālisindhu falling into the Chambal). [The river, like a chaste woman separated from her husband, would be thin and pining for the cloud who should do all he can to allay her grief.]

(9) The Sindhu river.

(10) Then the cloud would reach the **Avanti** country (extending to the Narmadā on the south, to the Māhī on the west, and to the Carmaṇvatī to the north).

(10) Avanti country.

(11) Thence to **Viśālā** or **Ujjayinī** on the **Siprā** river.

(11) Ujjayinī on the Siprā(river)

[The cloud would be struck by the enormous prosperity and splendour of Ujjayinī. The Siprā would have lots of Sārasas in her waters, and abundant lotuses as well. The cloud could see there the various sites connected with the exploits of King Udayana of old. He could also enjoy the sight of the beautiful ladies in the big mansions there, drying their hair after bath, or applying the Alaktaka dye to their feet, and would be greeted boisterously by the peacocks.]

(12) The cloud would then reach the famous holy temple of **Mahākāla** and enjoy the fragrant breezes from the **Gandhavatī** river.

(12) Mahākāla temple and the Gandhavatī river.

[Whatever may happen, the cloud should be present for the night-worship of Siva and serve that god by serving the purpose of drums by his thunderings. He would see the beautiful Devadāsīs there, waving the Cāmaras, and dancing before the deity. He would earn their gratitude if he showers over them a few water-drops soothing to the nail-wounds on their bodies. He could also win the golden opinion of Pārvatī, by acting as a substitute for the terrible elephant-hide (which Śiva holds high up in his hands, and whose sight is a constant night-mare to Pārvatī) at the Tāṇḍava dance of Śiva. He could oblige the Abhisārikās by directing them to their lovers' abodes with the lightning flash, taking care at the same time not to frighten those nervous ladies with thunder and rain. He should pass the night in company with lightning (his wife) and quit that place as early as possible in the morning, so as not to prolong the agonies of the खण्डिता ladies who have to be pacified by their faithless lovers at that time.]

(13) The cloud would next meet the **Gambhīrā** river who would love to sport with him.

(13) The Gambhīrā river.

[The Gambhīrā would do all she can to attract him and the cloud would have to gratify her wishes inspite of himself.]

(14) He would then reach the **Devagiri** (Devagad south-west of Jhansi) abounding in figs. [There the famous temple of Kumāra Kārtikeya and his peacock would be seen by him. The cloud should pay his respects to Kārtikeya and make his peacock dance by his thunderings.]

(14) The **Devagiri**

(15) Thence the cloud would reach the **Carmaṇvatī** river (modern Chambal). [This river is a standing monument to King Rantideva who performed numerous sacrifices where so many cows were slaughtered that their blood and hides flowed into a stream which came to be named Carmaṇvatī.]

(15) The **Carmaṇvatī** river

(16) Then the cloud would reach **Daśapura** (modern Mandasor). [The lovely women there would look at the cloud with curiosity.]

(16) **Daśapura**

(17) Then the cloud would reach the **Brahmāvarta** (north of Hastināpur) and **Kurukṣetra** [where in the Bhārata war Arjuna showed his extraordinary prowess and where there was a great massacre of the Kṣatriyas.]

(17) **Brahmāvarta** and **Kurukṣetra**

(18) By drinking the waters of the **Sarasvatī** river there, the cloud would become purified. [The great Balarāma had practised penance there to get rid of his sins.]

(18) The **Sarasvatī** river

(19) Thence he should go by the **Kanakhala** (hill near Hardwar.)

(19) The **Kanakhala** hill

(20) Thence to the **Ganges** (the holiest of all rivers) [who enabled the sons of Sagara to go to heaven and who has secured the privilege of sitting on the head of Śiva and has white waters. With the dark cloud hanging over there, it would appear as though the Jumna (whose waters are dark-coloured) had joined the Ganges at a wrong place (other than Prayāg where the confluence of the two rivers actually occurs)!]

(20) The **Ganges**

(21) Thence to the **Himālaya** [capped with snow and frequented by the musk-deer. The cloud should extinguish the forest-fire due to the clash of the Devadāru trees there, with showers of rain. If the Sarabhas happen to trouble him wantonly, he should teach them a lesson by pouring a hail shower capable of shattering them into smithereens.]

(21)The **Himālaya**

(22) Thence to the holy **Caraṇanyāsa** (हरका पाइरी near Hardwar). [The cloud should circumambulate it. So many faithful devotees have secured the status of Siva's Gaṇas by worshipping this most sacred place. The cloud would, by his thunderings there; help to make the paraphernalia for a musical concert of Śiva complete.]

(22) The **Caraṇa-nyāsa**

(23) Thence he should go through the **Krauñca** defile [bored through by Paraśurāma first, and used by the swans to go to the Mānasa lake.]

(23) The **Krauñca-randhra**

(24) Thence straight to the north to the **Kailāsa** [white like fresh ivory, the mirror for the heavenly damsels to do their toilet with, and the accumulated laughter, as it were, of Siva day by day. Here he could serve Pārvatī, by transforming himself into a flight of steps for her to ascend the Kailāsa-slopes, or provide a shower-bath for the ladies, occasionally frightening them if they become too much of a nuisance, or drink the waters of the Mānasa lake or play with Airāvaṇa or shake off the silken garments got from the Kalpa-trees.]

(24) The **Kailāsa**

(25) And then the cloud would reach his destination—the city of **Alakā** situate on the slopes of the Kailāsa (and appearing like a lady resting on the lap of her lover).

(25) **Alakā**

Stanzas 66–76A describe the city of Alakā. It is a city of palaces (sky-scrapers) and parks with beautiful women. The fine arts, music and painting are specially patronised there. The Yakṣas being always young are given to enjoyment, usually passing their time in the company of women, drinking

wine etc. on the terraces of their mansions. The Kalpa (Wish-fulfilling) tree is there to give them the famous Ratiphala wine.

The women need no ornaments of gold etc. to make them attractive. They like to wear different seasonal flowers in lieu of the ornaments, such as the lotus, Kunda (in the hair), Lodhra, Kurabaka (on the Cūḍāpāśa), Siriṣa (on the ear) and the Nīpa (at the parting of the hair on the head). The girls play with gems in the golden sands; gems are so lustrous that they can serve the purpose of lamps; moon-sto nes are used in plenty. The Kalpa-tree supplies the complete toilet-outfit for women.

The trees are always possessed of flowers and the evenings of moon-light. The female Kinnaras sing constantly the glory of Kubera in a sweet voice and the famous Vaibhrāja garden is always full of lovers thinking of nothing but enjoyment.

Stanzas 77-82 describe the mansion of Yakṣa and its surroundings.

The ancestral mansion of Yakṣa stands easily distinguished from other buildings by a lovely rain-bow-like archway, and having the figures of conch and lotus drawn on the two sides of the door, in the fashionable quarters of Alakā, to the north of Kubera's Palace. It is surrounded by a nice garden with a young Mandāra tree reared up specially by his wife and always groaning under the weight of clusters of flowers easily reached by the hand. In the garden is a tank easy of access owing to the emerald flight of steps specially constructed, and containing golden lotuses. The waters of the tank continue to be clear as crystal throughout the year, so that the swans who have made up their abode in them, do not think of leaving it even during the monsoon period (when waters usually get muddy) and stay on there, preferring it even to the Mānasa lake near by. There is in the garden a beautiful pleasure-hill—a specially favourite resort of the Yakṣa's wife—enclosed by golden plantain trees and having peaks made of sapphires, and lovely Raktāśoka and Bakula trees, between which is to be seen a golden perch where the peacock roosts in the evening

and is made to dance by the Yakṣa's wife with the clappings of her hands.

Stanzas 84–100 describe the Yakṣa's wife as affected by the separation.

The cloud should first rest on the pleasure-hill and then gently look into the house and he would see the Yakṣa's wife—the most beautiful woman in the whole world—slim, young, having pointed teeth, red Bimba-like lips and a thin waist, with bewitching eyes and a deep navel. She would be moving slowly and majestically owing to the weight of the hips and slightly stooping owing to the heavy breasts. Of course the separation from her lord would not have failed to produce its effect upon her and she would look like a lotus-plant blighted by frost, divested of all splendour. With her eyes swollen owing to incessant weeping and the lower lip faded owing to heavy sighs and the tresses tied up into a single braid, hanging loosely over the cheeks, she would present a very pathetic figure indeed. Most probably the cloud would see her engaged in the worship of the deities or in drawing a picture of her husband or in conversing in a familiar manner with the female parrot about her lord or in trying to sing a pathetic song concerning her lord with tears in the eyes, or in counting the flowers placed on the threshold day after day since the day of separation, with a view to find out when the curse on her lord would come to an end and when she could expect him back. She would be able to pass the day time somehow owing to being engaged in some work or other, but the night she would be passing very miserably, weeping bitterly and unable to get sleep or to enjoy the pleasures of the union with her lord even in dreams. With all ornaments discarded and the tresses become rough owing to the absence of ceremonial baths, with no collyrium in the eyes and leading a very simple life, she would not fail to make the cloud weep in sympathy for her.

She must have been hit very hard, indeed, by this separation which she had never experienced before. As the cloud would approach her she would look at him with wistful eyes and considerable agitation. If she happened to be asleep at the time the cloud approaches her, he should wait for a while,

he should cease thundering and not disturb her in sleep—perhaps she might be enjoying the company of the Yakṣa in a dream, who knows? Then gently awakening her by sprinkling a few water-drops over her, the cloud seated at the window should speak to her in firm but assuring tones, to inspire confidence.

[Stanzas 101–105 contain directions to the cloud as to how he should address the lady before giving the message proper which is contained in Stanzas 106–115].

The cloud should first assure her of the Yakṣa being alive by addressing her as *Avidhavā*, and introduce himself as one whose mission in life is to make the travellers go back to their homes and to effect union between separated lovers. The lady then would be naturally interested in the cloud and would pay the closest attention to what he would say further on; for, is not a message from the lover almost as good as a meeting with him, under certain circumstances? The cloud should then say by way of introduction :—

The Yakṣa, your lord and mate, staying on the Rāmagiri, almost like an ascetic, is keeping his ¦end up and bearing the separation bravely. He asks you how it fares with you. He is suffering as much as you are suffering and you are never absent from his mind. The whirligig of time has brought in extraordinary changes. There was a time when he used to tell you something not confidential at all, in your ear (obviously with a view to touch your face); but now hurled away far off from you, where he can not be seen or heard, he has employed me to deliver this message to you:—

"I am constantly reminded of you, O love, when I note the resemblances of various objects with you in part; the Syāmā creepers put me in mind of your physical frame in general; the eyes of the frightened female deer, of your eyes; the peacock's plumage, of your curly hair; and the waves of rivers, of the movements of your eye-brows; but—dash it all—where can I see you, entire and undivided?

I try to draw you in a picture where I am to be shown as falling at your feet; but I am so much overwhelmed with

emotion that tears well up in my eyes and it is impossible to draw the picture at all; so, good-bye to union with you even in a picture!

Occasionally, I see you in a dream and as I, like a mad man, try to clasp you seen in a dream in my arms, the sylvan deities shed tears, moved by my plight; I also try to embrace the breezes coming from the north, fondly hoping that perchance they might have come into contact with your body!

How to pass the long drawn out night, how to ensure that the day would cease to torment me—these problems are insoluble and I go on suffering and suffering terribly.

Of course, I am trying to bear all this with great fortitude; please do *not* be anxious on my account. My chief concern is for you. One can not hope to be always happy; these ups and downs in life are normal events in the life of all. But, fortune's wheel is always going round and these days of misery are bound to be followed by days of happiness—, is not the darkest hour nearest the dawn? Only four months remain now for the curse-period to end; bear up patiently till that time; and then, believe me, we shall make up for the lost time and enjoy life with greater zest and redoubled vigour. And lastly, beware of scandal-mongers who may be circulating reports about my having become cold towards you and the like. Never have I ceased to remember you and all about you. May I remind you of one incident that happened in strict privacy, which would clearly show that I have not forgotten you? Do you remember how one night you suddenly became awake all weeping and on being asked what the matter was, you replied laughingly: 'Rogue, I saw you in a dream flirting with another woman!' Not only have I not grown cold towards you, but on the contrary my love for you has become more forcible and more ardent. Truly has it been said that separation intensifies love and makes it more abiding." [The Yakṣa then requests the cloud to bring a return-message to him from his wife.]'

Stanzas 116–117 contain a farewell to the cloud.

The Yakṣa hopes that the cloud would consent to be his messenger. He does not want any response in so many words

to his appeal from the cloud, for the great do not talk but actually do the needful. The Yakṣa then wishes for the cloud (after his message is delivered) a happy pleasant journey over regions he likes best, and fervently hopes that *he* at any rate may never be separated from his wife, the lightning, even for a moment !

II Sources of the Meghadūta

It would be seen from the preceding section that the Meghadūta has really no plot as such. The poet does not care to give us even the name of the Yakṣa or to tell us what the offence was, for which he was punished by Kubera. The poet could have dilated on these topics at great length, if he had desired to do so. The conclusion is obvious that the whole background is what we describe in Sanskrit as उपलक्षणार्थं and that the real aim of the poet is to give us as accurate a description as possible of the countries and regions he is familiar with, and to describe the feelings of a sensitive young lover when separated from his wife for the first time. There can not be any positive evidence in this matter, but it appears to us to be more than probable that the poem contains an autobiographical element in it. Kālidāsa is giving vent to his own feelings under the guise of the Yakṣa. Tradition speaks of Kālidāsa as having been friendly with Pravarasena (to whom is attributed the authorship of the Setubandha conjointly with Kālidāsa) king of Vidarbha. One would like to think of Kālidāsa staying there and addressing a message to his wife far off (in Kashmere ?).

Both Dakṣiṇāvarta and Mallinātha assert that Kālidāsa had in his mind the message taken to Sītā by Hanūmat, as described in the Rāmāyaṇa[2]. In stanza 102, the poet actually refers to Sītā and Hanūmat (इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा). The idea in the verse तां जानीयाः......(stanza 85), has according to Dakṣiṇāvarta, its source in the passages from the Rāmāyaṇa. We think that while it is possible that the poet

---

(2) इह खलु कविः सीतां प्रति हनूमता हारितं संदेशं हृदयेन समुद्वहन् तत्स्थानीय-नायकाश्युत्पादनेन संदेशं करोति ।(द), सीतां प्रति रामस्य हनूमत्संदेशं मनसि निधाय मेघसंदेशं कविः कृतवानित्याहुः । (म).

might have been familiar with the above passages in the Rāmāyaṇa, they in no way can be regarded as showing that Kālidāsa was a plagiarist. The curse stories of Yakṣas in the Bṛhaṭkathā might have also helped the poet not a little. But the main idea about making the cloud a messenger is undoubtedly the poet's own: the description of the various cities, rivers etc. at once life-like and poetic, bears the stamp of Kālidāsa's genius; the description of the Yakṣa's wife and the grief of the Yakṣa, though more or less conventional, is clothed in beautiful language in the best manner of the poet. It appears futile to deny that Kālidāsa was the first in the field to write what may be called ' Dūta-poems'.[3]

It is usual to call the Meghadūta a Khaṇḍakāvya (खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च । यथा मेघदूतादिः । Sāhityadarpaṇa, VI 329) that is, a small Kāvya exhibiting only some of the features of a Mahākāvya.[4] Vallabha calls it a Kelikāvya and Sthiradeva names it as a Krīḍākāvya, but these nomenclatures are

---

(3) About sixteen of such ' Dūta-poems ' are known to exist, (the oldest of them being ' the Pavanadūta ' of Dhoyīka), Nemidūta, Uddhavadūta, Haṁsadūta, Manodūta etc. There are some very successful modern parodies as well. The great German poet Schiller in his ' *Maria Stuart* ' makes use of the idea of sending the cloud as a messenger,—

" Eilende Wolken, Segler der Lūfte !
" Wer mit euch wanderte, mit euch schiffte !
" Grūsset mir freundlich mein Jegendland !
" Ich bin gefangen, ich bin in Banden,
" Ach, ich hab ' keinen andern Gesandten !
" Frei in Lūften ist eure Bahn,
" Ihr seid nicht dieser Königin untertan !

(Act III, Scene 1)

Hultzsch however rightly remarks ' But, as *Maria Stuart* was written in 1800, while Wilson's translation of the Meghadūta appeared several years after Schiller's death (1805), this agreement is due to congeniality, and not to borrowing. '

(4) For the definitions of Mahākāvya, see Introduction (VIII-IX) to my edition of the Kumārasambhava.

not known to rhetoricians. Sthiradeva makes a brave effort[5] to prove that 'the Meghadūta is all the same a Mahākāvya exhibiting as many as eighteen महाकाव्यलक्षणs. It is unnecessary to take Sthiradeva seriously. The Mahākāvya as defined by Daṇḍin or the Agnipūraṇa has certain main features viz.—it must be a long poem, it must be divided into several cantos (सर्गबन्धो महाकाव्यम्...सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसंधिभिः) and various metres should be employed and so forth. All these features are absent in the Meghadūta which approximates to a 'Lyrical poem,' to use English terminology.

III Critical Appreciation

The Meghadūta is, by common consent, admitted to be one of the best works of Kālidāsa. It is small in size, but is packed up with excellences, both of language and thought, and the theme itself is such as to evoke a ready response from the reader.

(1) The metre used is the Mandākrāntā[6] which is admirably fitted for describing the sentiment of pathos and tender emotions. Short pithy sayings embodying ideas which would naturally appeal to the reader, are found interspersed now and then (see Appendix A).

(2) The description of the various places of interest, cities, rivers, etc. is astonishingly accurate and the changes effected in nature by the advent of the rainy season are por-

---

(5) विदिशाविशाला...नगरीवर्णनम्। ... 'हस्ते लीलाकमलम्' इत्यनेन .. ऋतूनां निरूपणम्। 'यत्र स्त्रीणाम्' एतेन चन्द्रोदयसमर्थनम्। 'अप्यन्यस्मिञ्जलधर '...भानूदयनिवेदनम्। विश्रान्तःसन्'...उद्यानस्तुतिनिगदनम्। 'भर्तुः कण्ठच्छविः '...जलकेलिकथनम्। " जालोद्गीर्णै "...मन्त्रचिन्ता। दूतो मेघ एव। 'मार्गं तावत् '...प्रयाणकथनम्। 'ये त्वा ' ...युद्धप्रबोधनम्। 'शापान्तो '...नायकाभ्युदयभणनम्। विप्रलम्भः कथयैव समर्थितः।... 'तां चावश्यम्'... पत्युद्देशः। 'यःसंयोग ' इति विवाहकथनम्। 'तत्र स्कन्दम् ' इति कुमारकथनम्। एवमेतैर्नगनगरीसागरर्तुचन्द्रार्कोदयोद्यानजलकेलिमधुपानसुरतमन्त्रदूतप्रयाणाजिनायकाभ्युदयविवाहविप्रलम्भकुमारवर्णनैर्विस्पष्टैरष्टादशभिरमीभिर्महाकाव्यलक्षणैरुपलक्षितत्वादस्य महाकाव्यत्वम्।

(6) मन्दाक्रान्ता—17 syllables in a quarter. यति at the 4th and the 10th मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्। गणs म, भ, न, त, त, ग, ग. This metre is said to be specially fitted to describe journeys, rainy season and pitiable conditions (प्रावृट्प्रवासव्यसने मन्दाक्रान्ता विराजते).

trayed with the hand of a master. In the hands of an inferior poet, such a description would have been easily a mere catalogue of names, at once tedious and boring. Not so with Kālidāsa. In one or two places the Śṛṅgāra sentiment borders on the obscene, but on the whole a very high level is maintained in the matter of suggestive comparisons. The poet again never loses his sense of proportion. He describes the various opportunities for the cloud to act the part of a lover in the first half of the cloud's journey. But when the Mahākāla, Brahmāvarta, Caraṇanyāsa etc. are reached, the poet is seen in an intense devotional mood which reaches its climax in verse 57 (तत्र व्यक्तं दृषदि...) where the poet undoubtedly is referring to his own belief in the efficacy of the worship of the Caraṇanyāsa of Hara. The description of Alakā is conventional, but the mansion of Yakṣa is described in such a detailed manner that one can see the mansion rising up before one's eyes.

(3) The description of the Yakṣa's wife and her विनोदनs is extremely pathetic. The poet places before us the conventional picture of a प्रोषितभर्तृका. The reason why this part of the poem has a powerful appeal to the reader is that he himself is able to vouchsafe for the accuracy of the experiences involved in this connection.

(4) The actual message of the Yakṣa to his wife is a master-piece of its kind. He first describes how he is constantly thinking of her and how keenly he feels the separation. Union with her even in a picture is denied to him, for so great is his emotion that he can not possibly draw such a picture, owing to his eyes being full of tears. The sylvan deities sympathise with him, but he finds no remedy to allay his grief. The only thing to do therefore is to bear up patiently and he expects his wife to do the same; and lastly (this is the most delightful natural touch) the Yakṣa refers to an incident that had occurred in strict privacy.

The poem ends with an आशीर्वाद to the cloud—'May you not be separated from your wife even for a moment'!—'Amen' says the reader and feels sorry that the poem has not been longer than what it is.

It would be seen that out of 25 and odd places on the route of the cloud, as many as 12 (5—16) are in the small region of Malwa; and here too very small rivers and hills (which cannot be identified now) are referred to. This fact as well as the special request to the cloud to go to Ujjayinī even though it involved taking a circuitous route (वक्रः पन्था यदपि भवतः—Stanza 27) can be reasonably taken to mean that Kālidāsa had most probably lived in the Malwa region for a long time.

In the Meghadūta Kalidāsa deals with the problem of temporary separation of the lovers. In Kumārasaṁbhava IV, he describes the lamentation of Rati when Madana was burnt down to ashes (This however proves ultimately to be a temporary separation, for Madana is brought back to life later on). In Raghu VIII, Aja laments the loss of Indumatī by death, and in spite of the highly philosophical consolatory message sent by the great Vasiṣṭha, per his pupil, refuses to be consoled (and the pearls of wisdom of Vasiṣṭha go back to him with his pupil) and ultimately voluntarily ends his life ! Is therefore no remedy available here for persons permanently separated on this earth, to console themselves, except to believe in the dictum 'He is not dead, who continues to be remembered?' If so, it seems to be a very poor consolation indeed !

IV The Text

The text of the Meghadūta may be taken to have been fairly fixed, with the exception of about a dozen stanzas, at least six of which are admitted by all to be interpolations. We have followed the text and the order of the verses as given by Dakṣiṇāvarta (about the 13th century). Hultzsch gives the text as commented upon by Vallabha (about the 10th century). Prof. Pathak gives the text as given in the Pārśvābhyudaya (8th century) of Jinasena who has so constructed his work that 'each stanza in the Pārśvābhyudaya borrows one or two lines from the Meghadūta,' the remaining lines being composed by Jinasena himself. In this way the entire poem of Kālidāsa is subjected to the process of what is known as '*samasyā-pūraṇa*' (P. xxiii, Introduction to Pathak's edition). Dr. V. G. Paranjpe has recently published an edition of the Meghadūta with the commentary of Sthiradeva (12th century). Malli-

nātha's (15th century) commentary is quite well-known. In all about forty commentaries on the Meghadūta are known to exist. In our opinion, Dakṣiṇāvarta is the ablest of the old commentators (while the विद्युल्लता easily holds the palm among modern commentaries).

The text of the Meghadūta found in the Pārśvābhyudaya seems to be the oldest available and Prof. Pathak considers it to be the most authoritative. Prof. Pathak is almost fanatical on this point. He has completely lost his balance when he ridicules Dr. Hultzsch for the remark 'Jinasena has incorporated in his poem nine of the spurious verses of the Meghadūta, five of which are stamped as interpolations even by so late a writer as Mallinātha' by deducing the principle ' the later a writer is, the less reliable he is in his opinions regarding ancient texts.' At best, it can be said that Jinasena, Vallabha and Dakṣiṇāvarta follow slightly different recensions, but whereas Vallabha and Dakṣiṇāvarta had no axe to grind, Jinasena was interested in making use of all stanzas that were regarded by some one or other as forming part of the Meghadūta.

Most of the important readings are given in foot-notes to the text. For questions like 'The date of Kālidāsa' or his other works, the student is referred to my editions of Mālavikāgnimitra, Vikramorvaśīya, Raghuvaṁśa and Kumārasaṁbhava.

श्रीः

मेघदूतम्

(पूर्वमेघः)

कश्चित्कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥

CONSTRUE : कश्चित् स्वाधिकारप्रमत्तः कान्ताविरहगुरुणा वर्षभोग्येण भर्तुः शापेन अस्तंगमितमहिमा यक्षः जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु रामगिर्याश्रमेषु वसतिं चक्रे ।

(१) मन्त्रदूतश्रवणाद्यभावान्महाकाव्यमपि खण्डकाव्यवन्न भवति । तथाख्यायिकाव्यपदेशस्तु दूरापेत एवात्र । प्रावृडाश्रयः प्रवासविप्रलम्भः कवेर्वर्णयितुमिष्टोऽत्र । स च नायकमनाश्रित्य वर्ण्यमानस्तथा रसवत्तां न धारयति । न च शृङ्गारविधानम् , गुह्यकोऽत्र नायकतयाश्रितः । तस्य च विरहोन्मत्तत्वाद्दूत्ये मेघप्रेरणमपि नायुक्तमिति केलिकाव्यमित्येतत्सर्वं स्वस्थम् । ...जनकतनया...राघवसंनिधानेऽपि सीतायाः प्रशंसा शृङ्गाराश्रयत्वेन काव्यस्य चिकीर्षितत्वात् । ...रामगिरिरत्र चित्रकूटः । न ऋष्यमूकः । तत्र सीताया वासाभावात् । (व)

इह खलु कविः सीतां प्रति हनूमता हारितं संदेशं हृदयेन समुद्वहन् तत्स्थानीयेनायकाद्युत्पादनेन संदेशं करोति । ...रामकथाभिलापे लिङ्गम् 'इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा ' इति वक्ष्यमाणवचनम् । ...स्वाधिकारप्रमत्त इति पाठे समासः कृच्छ्रलभ्यः । ...जनकतनयेत्यादिना रामकथा सूचिता । ...रामगिर्याश्रमेषु अनेनापि रामकथा सूचिता । बहुवचनेन विरहखेदादेकत्रावस्थानं तस्य न भवतीति सूचितम् । (द)

अत्र काव्ये तत्र तत्र नगनगरार्णवादिवर्णनासंभवान्महाकाव्यत्वम् । रसो विप्रलम्भाख्य शृङ्गारः । तत्राप्युन्मादावस्था । अत एवैकत्रानवस्थानं सूचितमाश्रमेष्विति बहुवचनेन । सीतां प्रति रामस्य हनुमत्संदेशं मनसि निधाय मेघसंदेशं कविः कृतवानित्याहुः । (म)

Meghadūta

(1) A certain Yakṣa, careless in respect of his office, with [his] glory made extinct by [his] master's curse [which was] to be experienced for a year [and which was weighing] heavy on account of the separation from [his] beloved, made [his] residence in the hermitages on the Rāmagiri [mountain named after Rāma], possessing dense shady trees and waters sanctified by the baths of the daughter of Janaka [that is, Sitā].

---

१ स्वाधिकारात्प्रमत्तः ।

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

CONSTRUE: अबलाविप्रयुक्तः कनकवलयभ्रंशरिक्तप्रकोष्ठः सः कामी तस्मिन् अद्रौ कतिचित् मासान् नीत्वा आषाढस्य प्रथमादिवसे आश्लिष्टसानुं वप्रक्रीडापरिणतगजप्रेक्षणीयं मेघं ददर्श ।

(२) आषाढस्य प्रशमदिवसे समाप्तिदिने ग्रीष्मावसाने । केचित्तु शकारथकारयोर्लिपिसारूप्यमोहात् प्रथम इत्यूचुः कथं कथमपि चैतमेवार्थं प्रतिपन्नाः । वर्षाकालस्य प्रस्तुतत्वादादिदिनमित्येतत्त्वतीव विरुद्धम् । (व)

अबलाविप्रयुक्तः । पूर्वश्लोके कान्ताविप्रयोगे कथिते सत्यपि पुनर्वचनं वक्ष्यमाणकनकवलयभ्रंशादेः कान्ताविरह एव निमित्तामिति सूचयितुम् । कामीति पद्माश्रमवासित्वेऽपि तस्य तपःपरत्वं नास्तीति सूचयितुम् । ...विरहकार्श्यात् कामिनां कनकवलयभ्रंशो भवति । ...न त्वधिकारनिषेधादिति भावः । वप्रक्रीडापरिणतगज...अनेन विशेषणेन मत्तगजदर्शनात् कार्यसिद्धिर्भवतीति सूचितम् । अत्र महायात्रायां वराहमिहिरः–ज्वलितशिखिफलाक्षतेपुभक्षद्विरदमृदङ्गकचामरायुधानि । मरकतकुरुविन्दपद्मरागस्फटिकमणिप्रमुखाश्च रत्नभेदाः ॥ स्वयमपि रचितान्ययत्नतो वा यदि कथितानि भवन्ति मङ्गलानि !' (द्व)

केचित् ' आषाढस्य प्रथमादिवसे' इत्यत्र ' प्रत्यासन्ने नभसि ' इति वक्ष्यमाणनभोमासप्रत्यासत्त्यर्थं ' प्रशमादिवसे ' इति पाठं कल्पयन्ति तदसंगतम् । प्रथमातिरेके कारणाभावात् । नभोमासस्य प्रत्यासत्त्यर्थमित्युक्तमिति चेन्न । प्रत्यासत्तिमात्रस्य मासप्रत्यासत्त्यैव प्रथमादिवसस्याप्युपपत्तेः । अत्यन्तप्रत्यसत्तेरुपयोगाभावेनाविवक्षितत्वात् । विवक्षितत्वे वा स्वपक्षेऽपि प्रशमादिवसान्तिमक्षणे मेघदर्शनकल्पनायां प्रमाणाभावेन तदसंभवात् । प्रत्युतास्मत्पक्ष एव कुशलसंदेशस्य भाव्यनर्थप्रतीकारार्थस्य पुरत एवानुमानमुक्तं भवतीत्युपयोगासिद्धिः । ननून्मत्तस्य नायं विवेक इति चेन्न । उन्मत्तस्य नानर्थस्य प्रतीकारार्थं प्रवृत्तिरपीति संदेश एव माभूत् । तथा च काव्यारम्भ एवासिद्धः स्यादित्यहो मूलच्छेदी पाण्डित्यप्रकर्षः । कथं तर्हि ' शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ ' इत्यादिना भगवत्प्रबोधावधिकस्य शापस्य मासचतुष्टयावशिष्टस्योक्तिः । दशदिवसाधिक्यादिति चेत्स्वपक्षेऽपि कथं सा विंशतिदिवसैर्न्यूनत्वादिति संतोष्टव्यम् । तस्मादीषद्वैषम्यमविवक्षितमिति सूक्तं 'प्रथमादिवसे' इति । (म)

---

(2) Having passed some months on that mountain, that uxorious one, separated from [his helpless] wife, with [his] forearm bare on account of the slipping of the golden bracelet [owing to extreme emaciation], saw on the first day of [the month of] Āṣāḍha, a cloud resting on a peak, [and] as charming to look at as an elephant in position for giving a side-blow by his tusks, in the sport of battering against a rampart.

---

१ प्रशमदिवसे ।

तस्य स्थित्वा कथमपि पुरः [1]कौतुकाधानहेतो-
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ॥

CONSTRUE : कौतुकाधानहेतोः तस्य पुरः कथम् अपि स्थित्वा अन्तर्बाष्पः राजराजस्य अनुचरः चिरं दध्यौ; मेघालोके सुखिनः अपि चेतः अन्यथावृत्ति भवति, कण्ठाश्लेषप्रणयिनि जने दूरसंस्थे किं पुनः।

(३) मेघालोके वर्षाकाले...मेघा आलोक्यन्ते यस्मिन्निति वर्षाः। (व) केतकाधानहेतोरिति पाठे केतकानां गर्भाधानहेतोरित्यर्थः किल भवेत्। इदमत्यन्तश्लाघ्यविशेषणं न स्यादिति बोद्धव्यम्। ...तस्याश्लेषप्रणयिनि जन इति पाठः। (द) विरहिणां मेघसंदर्शनमुद्दीपनं भवतीति भावः। अर्थान्तरन्यासोऽलंकारः। (म)

प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम्।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥

CONSTRUE : नभसि प्रत्यासन्ने जीमूतेन स्वकुशलमयीं दयिताजीवितालम्बनार्थी प्रवृत्तिं हारयिष्यन् प्रीतः सः प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै स्वागतं प्रीतिप्रमुखवचनं व्याजहार।

(४) आषाढस्य प्रशमदिवस इति य एवार्थ उक्तः स एव प्रत्यासन्ने नभसीत्यनूदितः। नभाः श्रावणः। यदि वा जलदनिचितत्वात् प्रत्यासन्ने निकटवर्तिनीव नभसि गगन इति व्याख्येयमिति केचित्। (व)

---

(3) Standing in front of him, with great difficulty, [who was] the cause of producing love-sickness [or desire for sensual enjoyment], the servant of the Lord of Yakṣas, with tears suppressed, was long absorbed in thought; at the sight of a cloud, the mind even of the happy [lovers not separated from each other] undergoes a change [that is, becomes excited]; what then when the person longing for the embrace by the neck, is staying far away!

(4) [The month of] Śrāvaṇa being at hand, he, wishing to send news about his being all right [to her] for the sake of sustaining the life of [his] beloved, by the cloud, well-pleased, offered a welcome in words prominently [expressive] of affection [or which was the chief word to express one's affection] to him to whom a respectful offering of worship (*argha*) had been made with fresh Kuṭaja flowers.

---

१ केतकाधान। २ .तस्याश्लेष। ३ मनासि। ४...लम्बनार्थी।

प्रत्यासन्ने...मनसि...ध्यानव्याकुलिते हृदये पुनः प्रतिष्ठिते सतीत्यर्थः। प्रत्यासन्ने नभसि इति पाठे नभःशब्दः श्रावणमासवचनः। ...तदा प्रस्तुतमाषाढं विहाय विलम्बनमयुक्तमिति मन्तव्यम्। किंच श्रावणमासे 'मासानन्यान् गमय चतुरो लोचने मीलयित्वा' इति वचनं स्यादयुक्तमिति। अन्ये त्वाहुः-नभःशब्दो वर्षर्तुवाचकः...वर्षासमयात् प्रागेव तस्य चिन्तेति। तदप्यसंगतम् 'इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे' इति तात्कालिककार्यचिन्तानिर्देशात्। ...प्रीतिप्रमुखवचनं पूज्यानां प्रीतिवचने प्रधानवचनं स्वागतं...अनेन स्वागतशब्दो विवक्षितः। (द्द)

नाथेन तु...'प्रत्यासन्ने मनसि' इति पाठः कल्पितः। ...यस्तु तेनैव पूर्वपाठविरोधः प्रदर्शितः सोऽस्माभिः 'आषाढस्य प्रथमदिवसे' इत्येतत्पाठविकल्पसमाधानेनैव समाधायि। (म)

धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघः
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥ ५ ॥

CONSTRUE : धूमज्योतिःसलिलमरुतां संनिपातः मेघः क्व, पटुकरणैः प्राणिभिः प्रापणीयाः संदेशार्थाः क्व, इति औत्सुक्यात् अपरिगणयन् गुह्यकः तं ययाचे; कामार्ताः हि चेतनाचेतनेषु प्रकृतिकृपणाः।

(५) निधिं गूहत इति गुह्यकः। यक्षाणां वैश्रवणनिधिगूहनात् क्रियानामधेयमिदम्। अथवा यक्षगुह्यकशब्दौ धनदेऽपि वर्तेते। ...तस्माद् वैश्रवणवाचकेन गुह्यकशब्देन तद्भृत्यानां यक्षाणां व्यपदेशस्य युक्तत्वादुक्तं गुह्यक इति। ...अचेतनेष्वर्थार्तिं वक्तव्ये चेतनाचेतनग्रहणं धूमज्योतिःसलिलमरुतामित्यादिना प्रस्तुतस्याचेतनस्य तदनन्तरं क्व पटुकरणैरित्युपक्षिप्तस्य चेतनस्य चानुगुणेन कृतमित्यनुसंधेयम्। (द्द)

अत्र मेघसंदेशयोर्विरूपयोर्घटनाद्विषमालंकारः। सा (विषमालंकृतिः) चार्थान्तरन्यासानुप्राणिता। (म)

---

(5) Where the cloud, a compound of vapour, heat, water and wind, [and] where the messages that have to be carried by living creatures possessed of sound organs of sense? [that is, there is a great incongruity between the two objects]—not taking this into consideration, through eagerness, the Guhyaka [Yakṣa] implored him ; for those [that are] oppressed by love [are] by nature incompetent as regards [that is, to distinguish between] animate and inanimate objects.

---

१ संदेशार्थः...प्रापणीयः। २ प्रणय।

जातं वंशे भुवनविदिते पुष्कलावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा वन्ध्या वरमधिगुणे नाधमे लब्धकामा ॥ ६ ॥

CONSTRUE : पुष्कलावर्तकानां भुवनविदिते वंशे जातं मघोनः कामरूपं प्रकृतिपुरुषं त्वां जानामि, तेन विधिवशात् दूरबन्धुः अहं त्वयि अर्थित्वं गतः, अधिगुणे वन्ध्या याच्ञा वरम् अधमे लब्धकामा न।

(६) पुष्करावर्तकानां...इति कुलीनत्वोक्तिः । ...मघोनः प्रकृतिपुरुषम-मात्यपुरुषमिति प्रभावकथनम् ।...प्रकृतिषु प्रकृतिश्चासाविति वा पुरुषः प्रकृतिपुरुषः। स्वाम्यमात्यौ च राष्ट्रं च कोशो दुर्गं बलं सुहृत्। सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते ॥ (व)

कामरूपम्...इदं विशेषणं दुर्गादिगमनार्थम्। ...दूरबन्धुर्दूरस्थभार्यः। बध्नातीति बन्धुरिति व्युत्पत्त्या बन्धुशब्दो भावबन्धिन्यां भार्यायां वर्तते। (द)

अर्थान्तरन्यासानुप्राणितः प्रेयोऽलंकारः। (म)

संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः
संदेशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥ ७ ॥

---

(6) I know you [to be] born of the race, known the world over, of Puṣkalāvartaka [clouds], [to be] the principal officer of Indra [and to be able] to possess [any] form at will ; [and] hence, I, away from [my] wife through the working of fate, stand as a suppliant before you ; a request [made] to a highly meritorious person, [though] turned down [lit. barren], [is] better than [one made] to a vile person, [and succeeding in] securing the desired object.

(7) You are, O cloud [lit. water-giver], the refuge of those [that are] oppressed [by heat] ; so, carry for [my] beloved a message of me torn away [from her] by the wrath of the Lord of wealth ; you have to go to the abode of the lordly Yakṣas [or the Lord of the Yakṣas], by name Alakā, where the mansions are brightened [lit. washed clean] by the light of the [crescent] moon on the head of Śiva staying in the garden outside.

---

१ मोघा।

CONSTRUE : (हे) पयोद, त्वं संतप्तानां शरणम् असि, तत् धनपतिक्रोध-विश्लेषितस्य मे प्रियायाः संदेशं हर, यक्षेश्वराणां वसतिः बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या अलका नाम ते गन्तव्या ।

(७) बाह्यो...सा दिनेऽपि विक्षालितसौधा । (व)

मेघः खलु प्रोषितप्रियतमप्रेरणया तान् प्रोषितान् प्रियतमाभिः संगमय्य तेषां मिथुनानां संतापं हरति । तस्मात् संतप्तानां त्वमसि शरणमित्युक्तम् । ...बाह्योद्यान... अत्र केचित् कैलासालयवर्तिनः परमेश्वरस्यालकोद्याने चैत्ररथेऽवस्थानमयुक्तमिति मन्यमाना एवं व्याचक्षते—कैलासोत्सङ्गवर्तिन्या अलकाया बहिर्निस्सरणप्रदेश उद्यानशब्देन विवक्षित...इति । (द)

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः[1] ।
कः संनद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव[2] जनो यः पराधीनवृत्तिः ॥ ८ ॥

CONSTRUE : प्रत्ययात् आश्वसत्यः उद्गृहीतालकान्ताः पथिकवनिताः पवनपदवीम् आरूढं त्वां प्रेक्षिष्यन्ते; त्वयि संनद्धे कः विरहविधुरां जायाम् उपेक्षेत, अहम् इव यः पराधीनवृत्तिः अन्यः अपि जनः न स्यात् ।

(८) यद्यन्योऽपि जनस्तादृशो न स्यात् । कीदृशः मादृशः पराधीनवृत्तिः । अथवा कोऽन्यो जनो जायामुपेक्षेतेत्यत्र संबन्धः । स्वाधीना हि कान्ताभिः सह रममाणाः प्रावृषमतिवाहयन्ति । (व)

उद्गृहीतालकान्ताः प्रियविरहात् कपोललम्बित्वादलकानामुद्ग्रहणमुक्तम् ।... आश्वसत्य इति नुमागमरहितः पाठः । (द)

अत्रार्थान्तरन्यासोऽलंकारः । (म)

---

(8) Travellers' wives getting comfort owing to [their] confidence [in your ability in bringing about union of lovers], holding high the ends of [their] curly hair [hanging on their cheeks] would be looking at you moving up in the sky ; when you are ready, who [indeed would] neglect [his] wife dejected owing to separation? There could not be even others who like myself have [their] actions [or behaviour] dependent upon others.

१...श्वसन्त्यः । २ व्ययमिव ।

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ ९ ॥

CONSTRUE : यथा अनुकूलः पवनः च त्वां मन्दं मन्दं नुदति अयं च ते सगन्धः वामः चातकः मधुरं नदति; नूनं गर्भाधानक्षणपरिचयात् आबद्धमालाः बलाकाः नयनसुभगं भवन्तं खे सेविष्यन्ते ।

(९) वामो वामपार्श्वस्थो वल्गुवादी वा । तोयगृध्नुर्जलमभिलाषुकः । (व)

मन्दपवनानुकूल्यमत्र निमित्तम् । ...यथाशब्दः सादृश्ये । ...अथवा यथाशब्दो यस्मादर्थे । प्रमाणं तु मृग्यम् । ...वामपार्श्वस्थस्य चातकस्य निनदो यात्रायां निमित्तमित्यत्र योगयात्रायां वराहमिहिरः ।...मेघसंगत्या बलाका गर्भं धारयन्तीति प्रसिद्धम् । ... आबद्धमालाः आबद्धपङ्क्तयः आबद्धपुष्पस्रज इति च ध्वन्यते । नयनसुभगाः, इदं विशेषणं च बलाकासु मेघप्रियासमाधिलिङ्गम् । खे व्योम्नि । अनेन विविक्तस्थानं च ध्वन्यते । (ढ)

मन्दं मन्दम् । अतिमन्दमित्यर्थः...अत्र कथंचिद्वीप्सायामेव द्विरुक्तिर्निर्वाह्या ।... क्षण उत्सवः ...उक्तं च कर्णोदये—'गर्भं बलाका दधतेऽभ्रयोगान्नाके निबद्धावलयः समन्तात् ।' इति । (म)

तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥ १० ॥

---

(9) A favourable breeze suitably goads you on in a very gentle manner and at the same time this your relation (*sagandha*) the Cātaka [bird] cackles sweetly on the left; surely the female cranes forming rows would be attending upon you attractive to the eyes, in the sky. on account of [their] familiarity with the happy occasion of conception.

(10) And you of unimpeded course would surely be seeing her, [your] brother's wife, chaste, intent on counting the days [of exile] [and] alive ; the tie of hope although possessing the strength like that of a flower, preserves the life [or heart] of women, affectionate and sinking in no time during separation.

---

१ चातकस्तोयगृध्नुः । सगर्वः । २ नयनसुभगाः । ३ कुसुमसदृशं प्रायशो ह्यङ्गनानां

CONSTRUE : तां दिवसगणनातत्पराम् एकपत्नीम् अव्यापन्नां भ्रातृजायां च अविहतगतिः अवश्यं द्रक्ष्यसि; आशाबन्धः अङ्गनानां कुसुमसदृशप्राणम् अपि विप्रयोगे सद्यःपाति प्रणयि हृदयं रुणद्धि ।

(१०) एकपत्नीम् । एका असपत्नीका पत्नी यज्ञसंयोगार्हा वेत्येकपत्नीति कर्मधारयः । असपत्नीकत्वात् पत्नीत्वाच्च तस्याः शीलखण्डनं न भवतीत्यभिप्रायः । ...भ्रातृजायाम् अनेन परस्त्रीदर्शननिषेधस्तवात्र न स्यात् त्वद्भ्रातृजायात्वादित्युक्तम् । (द)

भ्रातृजायाम् । मातृवन्निःशङ्कं दर्शनीयामित्याशयः । ... अर्थान्तरन्यासः । (म)

कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।
आ कैलासाद्बिसकिसलयच्छेदपाथेयवन्तः
संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ ११ ॥

CONSTRUE : यत् च महीम् उच्छिलीन्ध्राम् अवन्ध्यां कर्तुं प्रभवति तत् ते श्रवणसुभगं गर्जितं श्रुत्वा मानसोत्काः बिसकिसलयच्छेदपाथेयवन्तः राजहंसाः नभसि भवतः सहायाः कैलासात् आ संपत्स्यन्ते ।

(११) बिसानां किसलयानि तेषां छेदः खण्डः स एव पाथेयमध्वभोजनं विद्यते येषां ते तथोक्ताः । बिसकिसलयच्छेदैर्वा पाथेयवन्त इति विग्रहः । (व)

राजहंसानां श्रवणसुभगमित्यर्थः । परुषं मेघगर्जितमिति प्रसिद्धम् । ...ननु च हंसाः प्रियमानसाश्चेत् कुतो हेतोस्तद्विहाय देशान्तरे परिभ्रमन्ति । उच्यते । हिमालयैकदेशस्थं मानसं हिमदूषितसलिलादिकत्वादनुपभोग्यं भवति । ततस्तेषां देशान्तरगमनं भवति । वर्षसमये तु वर्षजलविरलितहिमत्वात् तस्य हंसनिवासयोग्यत्वमस्ति । (द)

कालान्तरे मानसस्य हिमदुष्टत्वाद्धिमस्य च हंसानां रोगहेतुत्वादन्यत्र गता हंसाः पुनर्वर्षासु मानसमेव गच्छन्तीति प्रसिद्धिः । (म)

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥ १२ ॥

---

(11) On hearing that thundering noise of yours, pleasing to the ear, which again (*ca*) has the power to make the earth have the mushrooms grown [and] fertile, the royal swans eager for the Mānasa lake, having bits of the shoots of lotus-stalks as provender for the journey, would happen to be your companions in the sky right up to the Kailāsa [mountain].

(12) Bid adieu to this [your] dear friend, the lofty mountain, by embracing [him] marked on the slopes [or summits] by the foot-prints of Rāma, adorable of men, who [the mountain] on being united with you season after season manifests [his] affection [for you by] shedding hot tears [vapour] due to long separation.

---

१ भवतो ।

CONSTRUE : पुंसां वन्द्यैः रघुपतिपदैः मेखलासु अङ्कितम् अमुं प्रियसखं तुङ्गं शैलम् आलिङ्ग्य आपृच्छस्व, काले काले भवता संयोगम् एत्य यस्य चिरविरहजम् उष्णं बाष्पं मुञ्चतः स्नेहव्यक्तिः भवति ।

(१२) पर्वता हि जलदवृष्ट्या स्निग्धा भवन्ति बाष्पं च मुञ्चन्ति। एतदेव सुहृत्त्वं यच्चिरेण सख्यौ दृष्टे बाष्पस्नेहौ जायेते । (व)

अत्र कश्चित् सुहृत् दूरादागतं सुहृदं दृष्ट्वा चिरविरहोष्णं बाष्पमुन्मुच्य सौहृदमाविष्करोतीत्यर्थः खण्डश्लेषालंकारेण प्रतीयत इत्यनुसंधेयम् । (द)

स्निग्धानां हि चिरविरहसंगतानां बाष्पपातो भवतीति भावः। (म)

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
संदेशं मे तदनु जलद श्रोष्यसि श्राव्यबन्धम् ।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपयुज्य ॥ १३ ॥

CONSTRUE : त्वत्प्रयाणानुरूपं मार्गं तावत् कथयतः मे शृणु-(हे) जलद, मे श्राव्यबन्धं संदेशं तदनु श्रोष्यसि-, यत्र खिन्नः खिन्नः शिखरिषु पदं न्यस्य, क्षीणः क्षीणः स्रोतसां परिलघु पयः च उपयुज्य गन्तासि ।

(१३) पानविश्रामौ हि पथि सुतरामुपयुज्येते । (व)

मार्गं तावत् कथयत इति पाठे कथयत इत्यस्य विशेष्यपदं नास्तीत्यनुसंधेयम् । ...परिलघुग्रहणं स्रोतोग्रहणं च पानीयस्य पथ्यत्वाय । अत्र वाहटे-' उपलास्फालनाक्षेपविच्छेदैः खेदितोदकाः । हिमवन्मलयोद्भूताः पथ्याः । ' इति । (द)

श्रोत्राभ्यां पेयं पानार्हम् । अतितृष्णया श्रोतव्यमित्यर्थः । पेयग्रहणात्संदेशस्यामृतसाम्यं गम्यते । (म)

---

(13) Listen now (*tāvat*) to [or learn from] me, O cloud, describing the path fit for your journey—my message couched in words agreeable to hear, you would be hearing afterwards—by which [path] you would be going, stepping [or resting] on mountains [when you would be] tired now and then, and drinking the very light waters of [flowing] rivers, [when grown] emaciated, time and again.

---

१ मत्तः । २ श्रोत्रपेयम् । ३ चोपभुज्य ।

अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः।
स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान् ॥ १४ ॥

CONSTRUE : पवनः अद्रेः शृङ्गं हरति किंस्वित् इति उन्मुखीभिः मुग्धसि-द्धाङ्गनाभिः चकितचकितं दृष्टोत्साहः (त्वम्) अस्मात् सरसनिचुलात् स्थानात् पथि दिङ्नागानां स्थूलहस्तावलेपान् परिहरन् उदङ्मुखः खम् उत्पत ।

(१४) दिङ्नागाना ... ते हि तं प्रतिद्विरदभ्रान्त्या ग्रहीतुमिच्छन्ति । (व)

अत्रेदमनुसंधेयम्—श्रीपर्वतरामगिर्यादयः सिद्धानां निवासस्थानमिति प्रसिद्धम् । अत एव रामगिरिवर्तिनीनां सिद्धाङ्गनानामौन्मुख्यं संभवति । ... सरसनिचुलादित्यत्र निचुल-पदेन निचुलाभिधानः कश्चन कविर्विवक्षितः । यस्य सूक्तिः सुभाषिते श्रूयते— 'संसर्गजा दोषगुणा भवन्तीत्येतन्मृषा येन जलाश्रयोऽपि । स्थित्वानुकूलं निचुलश्चलन्तमात्मानमारक्षति सिन्धुवेगात् ॥' इति । ... स तु निचुलकविरास्थानगतः कालिदासस्य सूक्तीः संभावयति । तस्मात् सरसपदेन तं कविः स्तौति । खमुत्पत । अनेन स्वकाव्यस्योच्छ्रितस्थानविजृ-म्भणं च विवक्षितम् । ... दिङ्नागानां ... अनेन दिङ्नागाचार्यश्च विवक्षितः । ... अयमभिप्रायः—दिङ्नाग इति कोऽप्याचार्यः कालिदासप्रबन्धानन्यत्रोक्तोऽयमर्थ इति स्थूलहस्ताभिनयैर्दूषयति । तमाचार्यं स्वप्रबन्धस्यापूर्वार्थाभिधायित्वमाश्रित्य मेघोपदेश-व्याजेन कविरुपालभत इति । (द)

अत्रेदमप्यर्थान्तरं ध्वनयति-रसिको निचुलो नाम महाकविः कालिदासस्य सहाध्यायी परापादितानां कालिदासप्रबन्धदूषणानां परिहर्ता यस्मिन्स्थाने तस्मात्स्थानादुदङ्मुखे निर्दोषत्वादुन्नतमुखः सन् पथि सारस्वतमार्गे दिङ्नागानां ... दिङ्नागाचार्यस्य कालिदास प्रतिपक्षस्य हस्तावलेपान्हस्तविन्यासपूर्वकाणि दूषणानि परिहरन् ... अद्रेरद्रिकल्पस्य दिङ्-नागाचार्यस्य शृङ्गं प्राधान्यम् । ... हरतीति हेतुना सिद्धैः सारस्वतसिद्धैर्महाकविभिरङ्गना-भिश्च दृष्टोत्साहः सन्खमुत्पतोच्चैर्भवेति स्वप्रबन्धमात्मानं वा प्रति कवेरुक्तिरिति । (म)

---

(14) Fly up into the sky, with [your] face to the north, your career [or brisk movements] being looked at with great surprise by the simple Siddha women, with [their] faces uplifted, thinking (*iti*) 'Is the wind carrying off the peak of the mountain ?' from this place of [that is, abounding in] wet canes, avoiding on the way association with [or, attacks by] the huge trunks of the quarter-elephants.

---

[1] किंस्वित् वहति पवनः शृङ्गमित्यु- ।

रत्नच्छाय[1]व्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता-
द्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥ १५ ॥

CONSTRUE : रत्नच्छायव्यतिकरः इव प्रेक्ष्यम् एतत् आखण्डलस्य धनुःखण्डं वल्मीकाग्रात् पुरस्तात् प्रभवति येन ते श्यामं वपुः स्फुरितरुचिना बर्हेण गोपवेषस्य विष्णोः इव अतितरां कान्तिम् आपत्स्यते ।

(१५) गोपा हि प्रायेण शबरवन्मयूरपिच्छधारिणः । प्रसङ्गाच्च वर्षावर्णनमपि कविना क्रियत इति मार्गोपदेशेऽपि नास्य श्लोकस्यानवसरः । (व)

रत्नच्छायाव्यतिकर इति पाठः । ...वल्मीकाग्रादिन्द्रधनुषः प्रादुर्भाव उक्तः संहितायाम्...अनेनार्थेनापि निमित्तं सूचितम् । (द)

त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः[2]
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यःसीरोत्कषणसुरभिक्षेत्रमारुह्य मालं
किंचित्पश्चाद्[3] व्रज लघुगतिर्भूय एवोत्तरेण ॥ १६ ॥

CONSTRUE : कृषिफलं त्वयि आयत्तम् इति भ्रूविलासानभिज्ञैः प्रीतिस्निग्धैः जनपदवधूलोचनैः पीयमानः (त्वं) सद्यःसीरोत्कषणसुरभिक्षेत्रं मालम् आरुह्य किंचित् पश्चात् व्रज, भूयः एव लघुगतिः उत्तरेण (व्रज)।

(१६) पश्चादनन्तरम्...हलोत्कृष्टा हि भूर्जलदजलकणव्यतिकरात्सुरभिर्भवति । (व)

---

(15) Here rises in front from the top of the ant-hill a piece of Indra's bow as charming to look at as a mixture of the lustres of gems, by which your dark body would be receiving considerable charm, like [that] of Viṣṇu in the dress of a cowherd by a peacock's feather having a flashing splendour.

(16) Being drunk by the eyes of [that is, being looked at intently by] village women, gentle on account of affection [and] ignorant of the sportive movements [or knitting] of the eye-brows, because (*iti*) the fruit of the agricultural operations rests on you, [and] having ascended the Māla the fields whereof are fragrant owing to the very recent ploughing operations, go slightly to the west [and] then once more to the north at a swift pace.

---

१ च्छायाव्यतिकर । २ भ्रूविकारानभिज्ञैः । ३ प्रवलय गतिं भूय... ।

अत्रेदमनुसंधेयम्—रामागिरेरुत्तरतः केचिद् देवमातृका जनपदाः सन्ति। तत्रत्याः स्त्रियः पामर्यः। तस्मात् तासां स्त्रीणां भ्रूविलासानभिज्ञत्वमुक्तम्। ...मालं पर्वतप्रायमुन्नतस्थलम्...मालयोगान्मालव इति प्रसिद्धो देशः। (द)

यथा कश्चिद्बहुवल्लभः पतिः कुत्रचित् क्षेत्रे कलत्रे गूढं विहृत्य ...दाक्षिण्यभङ्गभयान्नीचमार्गेण निर्गत्य पुनः सर्वाध्यक्षं संचरति तद्वदिति ध्वनिः। (म)

त्वामासारप्रशमितदवोपप्लवं[1] साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः[2]॥ १७॥

CONSTRUE: सानुमान् आम्रकूटः आसारप्रशमितदवोपप्लवम् अध्वश्रमपरिगतं त्वां साधु मूर्ध्ना वक्ष्यति; क्षुद्रः अपि संश्रयाय प्राप्ते मित्रे प्रथमसुकृतापेक्षया विमुखः न भवति, किं पुनः यः तथा उच्चैः।

(१७) त्वामासारेति—अनेन प्रथमोपकारः सूचितः। (द)

एतेन प्रथमावसथे सौख्यलाभात्ते कार्यसिद्धिरस्तीति सूचितम्। तदुक्तं निमित्तनिदाने—'प्रथमावसथे यस्य सौख्यं तस्याखिलेऽध्वनि। शिवं भवति यात्रायामन्यथा त्वशुभं ध्रुवम्॥' इति। (म)

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे[3]।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः॥ १८॥

---

(17). The mountain Āmrakūṭa would bear you well on the head [also, peak], who have quenched the wild fire by showers [and] who are overpowered by the fatigue of the journey; not even a low [or insignificant] person, taking into account [or, in deference to] previous favours [or obligations] turns [his] face away [that is, refuses help] when a friend approaches for refuge; what then one so high [or magnanimous]!

(18) When you, resembling in colour an oiled braid of hair, would have ascended the summit, the mountain [Āmrakūṭa] with its sides covered up [or concealed] by the wild mango-trees glistening with ripe fruit, [and looking] like the breast of the Earth, dark in the centre and yellowish-white in the remaining surface, would surely attain to a state fit to be seen by the heavenly couples.

---

१ वनोपप्लवं। २ तथोच्चः। ३ सर्पवेणी...

CONSTRUE : स्निग्धवेणीसवर्णे त्वयि शिखरम् आरूढे परिणतफलद्योतिभिः काननाम्रैः छन्नोपान्तः अचलः नूनं भुवः मध्ये श्यामः शेषविस्तारपाण्डुः स्तनः इव अमरमिथुनप्रेक्षणीयाम् अवस्थां यास्यति ।

(१८) सर्पवेणीसवर्णे । वेणी केशबन्धः । सर्पस्य वेणी सर्पस्य वेष्टनम् । वर्णतः संस्थानतश्च सर्पवेणीसमान इत्यर्थः । (द्र)

यथा परिश्रान्तः कश्चित्कामी कामिनीनां कुचकलशे विश्रान्तः सन् स्वपिति तद्वद्भवानपि भुवो नायिकायाः स्तन इति ध्वनिः । (म)

स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्तं
तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः ।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥ १९ ॥

CONSTRUE : वनचरवधूभुक्तकुञ्जे तस्मिन् मुहूर्तं स्थित्वा तोयोत्सर्गद्रुततरगतिः तत्परं वर्त्म तीर्णः उपलविषमे विन्ध्यपादे विशीर्णां रेवां भक्तिच्छेदैः गजस्य अङ्गे विरचितां भूतिम् इव द्रक्ष्यसि ।

(१९) कुञ्जं...अनेन वनचरवधूसंभोगं च द्रक्ष्यसीत्युक्तम् । मुहूर्तम् अनेन... तव कालविलम्बो मा भूदिति विवक्षितम् । ... वनचरमिथुनपरिभोगानतिदर्शनात् तव विषादो मा भूत् । संभोगलोलुपं मिथुनान्तरं द्रक्ष्यसीत्यभिप्रायेणाह रेवां द्रक्ष्यसीति । ...विन्ध्यपादे विशीर्णामित्यनेन कामातिशयात् प्रियतमपादे कस्याश्चित् पतनं ध्वन्यते । (द्र)

विशीर्णां...एतेन कस्याश्चित्कामुक्याः प्रियतमचरणपातोऽपि ध्वन्यते । (म)

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥ २० ॥

---

(19) Staying for a short while on it, the bowers of creepers of which are made use of by the wives of foresters [and] traversing the path beyond it, your pace being more quickened owing to the discharge of water, you would see the Narmadā shattered [into streamlets] at the foot of the Vindhya [mountain] rugged with stones [and appearing] like the coloured decoration on the body of an elephant, formed in variously painted streaks.

(20) Having poured forth showers, [and] taking her waters scented by bitter and fragrant ichor of wild elephants, with [their] force curbed by the thickets of Jambū trees, you should move on. The wind would not be able, O cloud, to make light of you substantial inside. Everything empty becomes light [or insignificant]; fullness ensures [lit. for] heaviness [or respect].

CONSTRUE : वान्तवृष्टिः तस्याः तिक्तैः वनगजमदैः वासितं जम्बूकुञ्जप्रतिहतरयं तोयम् आदाय गच्छेः, (हे) घन, अन्तःसारं त्वां तुलयितुम् अनिलः न शक्ष्यति; सर्वः रिक्तः हि लघु भवति, पूर्णता गौरवाय ।

(२०) पूर्णता तु गौरवाय भवति । आढ्यो हि सर्वेणाद्रियते । तेन तव जलेन गुरुत्वे सति नानिलात्परिभवप्राप्तिः । (व)

वनगजमदैः...अनेन गन्धसंस्कारो रूषितत्वं च विवक्षितम् । वान्तवृष्टिः, अनेन वर्षोत्सर्गश्छर्दिश्च । जम्बूकुञ्जप्रतिहतरयम्, अनेन लघुत्वं च कषायभावना च । अन्तःसारम्, अनेनाभ्यतरस्थजलत्वमभ्यन्तरबलत्वं च विवक्षितम् । घन, अनेन मेघश्च स्थिरशरीरश्च । अनिलः, अनेन बाह्यः शारीरवायुश्च । रिक्तः, अनेन कृशश्च कृतवमनशुद्धिश्च विवक्षितः । पूर्णता, अनेन तोयपानेन पेयादिक्रमेण चाप्यायनम् । अयमत्र समाधिः—कृतवमनशुद्धिः पुरुषः शेषदोषोपशोषणार्थं तिक्तकषायवासितं लघुजलं पिबति । पश्चाद् बलवतोऽस्य वायुरपि न कुप्यतीति । अत्र वाहटः–'कषायाश्चाहिमास्तस्य विशुद्धौ श्लेष्मणा हिताः । किमु तिक्ताः कषाया वा ये निसर्गात् कफावहाः' ॥ इति । खरनादेऽपि–' कृतशुद्धेः क्रमात् पीतपेयादेः पथ्यभोजिनः । वातादिभिर्न बाधा स्यादिन्द्रियैरिव योगिनः' ।।(द्व)

अयमत्र ध्वनिः । आदौ वमनशोधितस्य पुंसः पश्चात् श्लेष्मशोषणाय लघुतिक्तकषायाम्बुपानाल्लब्धबलस्य वातप्रकोपो न स्यादिति । (म)

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।
दग्धारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥ २१ ॥

CONSTRUE : अर्धरूढैः केसरैः हरितकपिशं नीपम् आविर्भूतप्रथममुकुलाः कन्दलीः च अनुकच्छं दृष्ट्वा । दग्धारण्येषु उर्व्याः अधिकसुरभिं गन्धम् आघ्राय च सारङ्गाः जललवमुचः ते मार्गं सूचयिष्यन्ति ।

(२१) सारङ्गा मयूरा मार्गं सूचयिष्यन्ति...तैर्हि मेघात्तोयकणाः पातव्या इति तदनुसरणम् । स्वादादिहृतचित्तत्वाद् व्रजंश्चासौ तैर्न लक्षित इति मार्गोन्नयनम् । (व)

---

(21) Seeing the Nīpa [flowers] green and brown, with the filaments half-grown and the plantain trees along the banks [or marshes] with [their] first buds manifested, and smelling the odour of the earth, particularly [or more] fragrant in the burnt-up forests, the Sārangas would be indicating [or, ascertaining] the path of you discharging drops of water.

---

१ जग्ध्वारण्ये । २ नवजलमुचः ।

नीपः कदम्बः । स च द्विविधः जलकदम्बः स्थलकदम्बश्चेति ... अत्र स्थलकदम्बो विवक्षितः । तस्य वर्षास्वेव प्रादुर्भावात् । ...अर्धरूढैः ...अनेन तस्य नवप्रादुर्भावः सूचितः । ...जग्ध्वेति पाठः । ...ननूर्वीगन्धस्य वक्ष्यमाणत्वात् दग्धारण्येष्विति पाठ एव युक्त इति । तन्न । दाहमन्तरेणापि वसुधागन्धस्य संभवात् । ...सारङ्गाः हरिणाः।... ये पुनः सारङ्गशब्देन चातकहरिणगजा विवक्षिता इति व्याचक्षते तेषां तु मतमुपेक्षणीयं सारङ्गशब्दस्य गजवाचित्वादर्शनात् । ...किंच एकस्यैव शब्दस्य युगपदनेकार्थत्वस्य भिन्नक्रियासमन्वयस्य च क्लिष्टत्वात् कन्दलीश्चेत्यत्र समुच्चयानुपपत्तेश्चेत्यलमतिविस्तरेण । (द)

सारङ्गाः मतंगजाः कुरङ्गा भृङ्गा वा । 'सारङ्गश्चातके भृङ्गे कुरङ्गे च मतगजे' इति विश्वः।... यत्र यत्र वृष्टिकार्यं नीपकुसुमादिकं दृश्यते तत्र तत्र त्वया वृष्टमित्यनुमीयत इति भावः । (म)

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान्गन्तुमाशु व्यवस्येत् ॥ २२ ॥

CONSTRUE : (हे) सखे, मत्प्रियार्थं द्रुतम् अपि यियासोः ते ककुभसुरभौ पर्वते पर्वते कालक्षेपम् उत्पश्यामि; सजलनयनैः शुक्लापाङ्गैः केकाः स्वागतीकृत्य प्रत्युद्यातः भवान् कथम् अपि आशु गन्तुं व्यवस्येत् ।

(२२) सनयनजलैः...सनयनजलत्वमत्र चिरेण मित्रालोकनात् । (व)

ककुभसुरभौ, अनेन पुष्पसंपत्तिर्निसर्गसिद्धेत्युक्तम् । ...सजलनयनैः ...अनेन पाद्यजलं सूचितम् । ...केका इत्यनेन कुशलप्रश्नो विवक्षितः । प्रत्युद्यातः प्रत्युद्गतः। आतिथ्यक्रियया प्रत्युद्गमनमत्र विवक्षितम् । (द)

परिणामालंकारः । (म)

---

(22) I fancy, O friend, [that there would be some] delay on the various mountains fragrant on account of the Kakubha flowers, in the case of you although desirous of travelling quickly for the sake of my beloved [or for doing good to me]. Greeted by the peacocks with their notes giving you a welcome with eyes full of tears [of joy], you should [however] try somehow or other to make a move quickly.

---

१ सनयनजलैः ।

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
नींडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥ २३ ॥

CONSTRUE : त्वयि आसन्ने दशार्णाः सूचिभिन्नैः केतकैः पाण्डुच्छायोपवनवृतयः, गृहबलिभुजां नीडारम्भैः आकुलग्रामचैत्याः, परिणतफलश्यामजम्बूवनान्ताः, कतिपयदिनस्थायिहंसाः संपत्स्यन्ते ।

(२३) वर्षभयाद्धि पक्षिणः प्रावृषि नान्यत्र प्रयान्ति । चैत्यं बुद्धालयः । यदि वा महाभोगप्रज्ञाततमो वनस्पतिश्चैत्यः । (व)

चैत्यं नाम चतुष्पथोद्देशस्थितो वृक्षः । (द)

...जम्बूवनानि तैरन्ता रम्याः । (म)

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमपि महत् कामुकत्वस्य लब्धा ।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यत्र
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि[3] ॥ ४२ ॥

CONSTRUE : दिक्षु प्रथितविदिशालक्षणां तेषां राजधानीं गत्वा सद्यः कामुकत्वस्य महत् फलम् अपि लब्धा, यत्र चलोर्म्याः वेत्रवत्या सभ्रूभङ्गं मुखम् इव स्वादु पयः तीरोपान्तस्तनितसुभगं पास्यसि ।

(२४) कामी हि कामिन्याः कुटिलभ्रु वक्त्रं स्वादु धयति । (व)

---

(23) When you would be near by, the Daśārṇa country would have the garden-fences possessed of a whitish lustre on account of the Ketaka flowers split up at the ends, big village trees noisy with the preparations for [building their] nests by the crows and others [lit. those that feed on the oblations at the houses], the regions of the Jambū thickets dark with ripe fruit, and the swans staying [there] for a few days.

(24) Having reached the capital of that [country], whose name Vidiśā is known all the quarters over, you would immediately realise even the most cherished (*mahat*) desire of a lover, where you would be drinking the sweet water of the Vetravatī with the waves surging up, in a charming manner owing to the thunderings near the banks, as if it were the face [associated] with the knitting of the eye-brows.

---

१ फलमविकलं कामु... ।　२ यत्तन् । यस्मात् ।　३ श्चलोर्मि ।

तीरोपान्तस्तनितसुभगामीति। अनेनाधरोपान्तस्तनितसीत्कारसुभगत्वं च विवक्षितम्। ...चलोर्मि...इदं विशेषणं सभ्रभङ्गविशेषणस्थानीयम्। ... उत्तरश्लोकपरिज्ञानायात्रेदमनुसंधेयम्–विदिशानगरवर्तिन्यः पण्याङ्गनाः सर्वाङ्गसुन्दर्यः सर्वललितकलाविचक्षणाः सर्वपुरुषावर्जनकुशलाश्च भवन्ति। तत्रत्याः पुनर्नागराः पुरुषास्ताभ्योऽप्यतिसुन्दराः सुभगयौवनाः स्त्रीसंभोगविदग्धाश्च भवन्ति। तेषां नागराणां सौन्दर्यातिशयेन तान् कामयमानाः पण्याङ्गनाः मात्रादिभयेन स्वगृहेषु भोक्तुमपारयन्त्यस्तस्मान्नगरान्निर्गत्य प्रत्यासन्नस्य नीचैराख्यस्य गिरेः संकेतस्थानभूतेषु शिलागृहेषु तैर्निर्दयं रतान्यनुभूयानुभूय पुनर्विदिशां गुप्तं प्रविशन्तीत्यैतिह्यमस्ति इति। (द)

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो–
स्त्वत्संपर्कात्पुलकितमिव प्रौढपुष्पैः कदम्बैः।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा–
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि॥ २५॥

CONSTRUE : तत्र विश्रामहेतोः प्रौढपुष्पैः कदम्बैः त्वत्संपर्कात् पुलकितम् इव नीचैराख्यं गिरिम् अधिवसेः, यः (नीचैराख्यः गिरिः) पण्यस्त्रीरतिपरिमलोद्गारिभिः शिलावेश्मभिः नागराणाम् उद्दामानि यौवनानि प्रथयति।

(२५) प्रौढपुष्पैः...केचित्स्वप्रौढेति पेठुर्मुकुलितत्वाच्च पुलकाकारतामाहुः। (व) विश्रामहेतोरित्यस्य रूपसिद्धिश्चान्द्रव्याकरणेनेत्यनुसंधेयम्। ...अयमभिसंधिः–तत्रत्या जना एवं विस्मयन्ते 'अहो नागराणां यौवनानि, यतः पण्याङ्गना अपि पणप्रदानं विना स्वसौभाग्येन वशीकृत्य स्वैरमेतेषु शिलागृहेषु भुञ्जते' इति। (द)

अत्रोद्गारशब्दो गौणार्थत्वान्न जुगुप्सावहः। प्रत्युत काव्यस्यातिशोभाकर एव। तदुक्तं दण्डिना–' निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्। अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते' इति। (म)

---

(25) There, you should stay, for the purpose of taking rest, on the hill known as Nīcaiḥ [which would be] as thou[gh] possessing horripilation, through contact with you, on acco[unt] of the Kadamba trees with flowers full-blown [or matured]— [Nīcaiḥ] which broadcasts the unbridled [passions of] youth of the [gallant] city-dwellers, by the stone-abodes [caves] emitting the [fragrance of the] sweet perfumes [used] in enjoyment by the courtesans.

---

१ विश्रान्ति ।

विश्रान्तः सन्व्रज वननदीतीरजानां निषिञ्च-
न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां
छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम् ॥ २६ ॥

CONSTRUE : विश्रान्तः सन्, वननदीतीरजानाम् उद्यानानां यूथिकाजालकानि नवजलकणैः निषिञ्चन्, गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां पुष्पलावीमुखानां छायादानात् क्षणपरिचितः (सन् त्वं) व्रज ।

(२६) वननदी काननसरिन्नदीविशेषो वा । (व)

छायाया अनातपस्य दानात् । कान्तिदानं च ध्वन्यते । ...कामुकदर्शनात् कामिनीनां मुखविकासो भवतीति भावः । (म)

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः ।
विद्युद्दामस्फुरितचकितैर्यत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥ २७ ॥

CONSTRUE : उत्तराशां प्रस्थितस्य भवतः यत् अपि पन्थाः वक्रः (तथापि) उज्जयिन्याः सौधोत्सङ्गप्रणयविमुखः मा स्म भूः, यत्र (उज्जयिन्यां) पौराङ्गनानां विद्युद्दामस्फुरितचकितैः लोलापाङ्गैः लोचनैः यदि न रमसे (तर्हि त्वं) वञ्चितः असि ।

---

(26) Having rested [yourself], proceed, sprinkling with fresh water-drops the masses of buds of the Yūthikās [Jasmine creepers] in the groves [or gardens] grown on the banks of the Vananadī [or forest-streams], flirting [or getting familiar] for a moment, by affording shade, with the faces of the flower-plucking [women] having [their] ear-lotuses faded owing to the discomfort due to the wiping off of the perspiration on [their] cheeks.

(27) Even though the way [would be] circuitous [lit. crooked] for you started for the northern direction, do not indeed be turning [your] face away from intimate association with the white-mansion-galleries of Ujjayinī, where if you are not charmed by the eyes of the city-damsels, dazzled by the flashes of the lightning-streaks [and] having unsteady corners, you would be deceived [made fool of by me, or you would have lived in vain] !

---

१ तीरजातानि सिञ्चन् । २ पन्थास्तव भवतु च प्रस्थित... । ३ वञ्चितः स्याः ।

(२७) तद्वञ्चितोऽसि । द्रष्टव्यादर्शनात् । (व)

वञ्चितः स्या इति, यदि तव तां रतिं न वेदयामि ततस्त्वं मया वञ्चितः स्या इत्यर्थः । यद्वा वञ्चितः स्याः व्यर्थजन्मा भविष्यसीति । (द)

वञ्चितः प्रतारितोऽसि । जन्मवैफल्यं भवेदित्यर्थः । (म)

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः ।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः संनिपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥ २८ ॥

CONSTRUE : पथि वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः स्खलितसुभगं संसर्पन्त्याः दर्शितावर्तनाभेः निर्विन्ध्यायाः संनिपत्य रसाभ्यन्तरः भव; स्त्रीणां हि प्रियेषु विभ्रमः आद्यं प्रणयवचनम् ।

विभ्रमो विलास एव...प्रार्थनावचः प्रीतिवाक्यं वा । ...साक्षात्तु तासां प्रार्थना लाघवकारिणी । (व)

स्खलितसुभगमिति, अनेन विलासगमनमपि ध्वन्यते । रसाभ्यन्तरः, अनेन रसशब्देन जलं शृङ्गारश्च विवक्षितम् । (द)

स्त्रीणामेष स्वभावो यद्विलासैरेव रागप्रकाशनम् । न तु कण्ठत इति भावः । (म)

वेणीभूतप्रतनुसलिला तामतीतस्य[1] सिन्धुः
पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः ।
सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥ २९ ॥

---

(28) Having descended upon, on the way, the Nirvindhyā, be intimate with [that is, enjoy her] love [also water], with the girdle-string [in the form] of the row of birds chirping loudly owing to the agitation of the waves, proceeding charmingly owing to [her] stumblings, [and] exhibiting [her] navel [in the form] of the eddies; for, in regard to [their] lovers, love-gesture [is] the first expression of love of women.

(29) O fortunate one, the remedy by which the Sindhu would give up [her] leanness [or, emaciation] has to be adopted by you alone,—[the Sindhu] suggesting by [her] state of separation the good fortune of you who have passed beyond her [the Nirvindhyā], having very little water forming the braid of hair, and a pale lustre on account of the dried up leaves falling down from the trees growing on the banks!

---

१ सा त्वतीतस्य । सलिलां तामतीतस्य सिन्धुं...च्छायां...व्यञ्जयन्तीं ।

CONSTRUE : वेणीभूतप्रतनुसलिला तटरुहतरुभ्रंशिभिः जीर्णपर्णैः पाण्डुच्छाया तां (निर्विन्ध्याम्) अतीतस्य ते सौभाग्यं विरहावस्थया व्यञ्जयन्ती सिन्धुः, (हे) सुभग, येन विधिना कार्श्यं त्यजति सः (विधिः) त्वया एव उपपाद्यः ।

(२९) प्रियविरहे हि नारी तनुः पाण्डुश्च भवति । (व)

वेणीशब्देन स्रोतश्च केशबन्धश्च विवक्षितः ...पाण्डुच्छाया, अनेन विरहपाण्डुत्वं च विवक्षितम् ।...तामतीतस्य इति पाठमादृत्य सिन्धुरिति नद्यन्तरमुच्यत इति केचिद्व वदन्ति । तदानीमर्थश्चापुष्टः । अत्र देशे सिन्धुरिति कापि नदी नास्ति काश्मीरेषु सिन्धुः प्रवहतीत्यनुसंधेयम् । (द)

' तामतीतस्य ' इति पाठमाश्रित्य सिन्धुर्नाम नद्यन्तरमिति व्याख्यानं तु सिन्धुर्नाम कश्चिन्नदः काश्मीरदेशेऽस्ति । नदी तु कुत्रापि नास्तीत्युपेक्ष्यमित्याचक्षते । (म)

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धा–
न्पूर्वोद्दिष्टामुपसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥ ३० ॥

CONSTRUE : उदयनकथाकोविदग्रामवृद्धान् अवन्तीन् प्राप्य पूर्वोद्दिष्टां श्रीविशालां विशालां पुरीम्, सुचरितफले स्वल्पीभूते गां गतानां स्वर्गिणां शेषैः पुण्यैः हृतं कान्तिमत् एकं दिवः खण्डम् इव (स्थिताम्) उपसर ।

(३०) अयमभिप्रायः[1] स्वर्गिणः स्वपुण्यफले सकलस्वर्गोपभोगे स्वल्पावशिष्टे सत्यस्मात् फलोपभोगात् पुण्यानि क्षीयन्ते, सकलस्वर्गोपभोगोऽपि दुर्लभ इति मत्वा शेषैः स्वकीयैः पुण्यैर्भूमौ स्वपुण्यानुरूपं स्वर्गैकखण्डं यदि कुर्युस्तदिव विराजमानामित्यर्थः । ननु ' सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखं, ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यत ' इत्यापस्तम्बवचनात् प्राणिनः कर्मशेषयुक्ता एव जायन्त इति प्रतीयते । तस्मादयमर्थः किमित्युपेक्षित इति । एतत्पक्षाश्रयणे विशालायाः समुत्कर्षो न स्यात्, कर्मशेषयोगेन जननस्य सर्वप्राणिसाधारणत्वादित्यलं विस्तरेण । (द)

दिवः स्वर्गस्य खण्डमिव ... एतेनातिक्रान्तसकलभूलोकनगरसौभाग्यसारत्वमुज्जयिन्या व्यज्यते । (म)

---

(30) Having reached the Avanti country with the old people in the villages, conversant with the Udayana legends, move on to the city already mentioned, Viśālā [having many big palaces] abounding in wealth [or, glory], [which is] as though a shining patch of heaven carried off by the remaining [portions of] merit of people [residing] in heaven, gone [down] the earth, when the fruit of [their] good deeds had dwindled down [and they could not have the privilege of staying in heaven any longer]!

---

१ मनुसर । २ पुण्यैः कृतमिव ।

दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
सिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥ ३१ ॥

CONSTRUE : यत्र (विशालायां) प्रत्यूषेषु पटु मदकलं सारसानां कूजितं दीर्घीकुर्वन् स्फुटितकमलामोदमैत्रीकषायः अङ्गानुकूलः सिप्रावातः, प्रार्थनाचाटुकारः प्रियतमः इव, स्त्रीणां सुरतग्लानिं हरति ।

(३१) कृतापराधः सुभगः प्रियतमः प्रातरेत्य स्वप्रेयसीवचनस्यावसरमवितरन्नेव पटु मदकलं स्ववचनं दीर्घीकुर्वन् पराङ्गनापरिभोगसुरभिगन्धः प्रेयसीं मदीयमपराधं क्षमस्वेति प्रार्थयमानश्चाटुकारी तस्याः पादपतनादङ्गानुकूलः सुरतालाभजनितां ग्लानिं यथा हरति तथा सिप्रावात इति । (द)

'प्रार्थनाचाटुकारः' इत्यत्र 'खण्डितनायिकानुनेता' इति व्याख्याने सुरतग्लानिहरणं न संभवति । (म)

[प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे
हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः ।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पा-
दित्यागन्तूनरमयति जनो यत्र बन्धूनभिज्ञः ॥ ३२ ॥

CONSTRUE : अत्र वत्सराजः प्रद्योतस्य प्रियदुहितरं जह्रे, अत्र तस्य एव राज्ञः हैमं तालद्रुमवनम् अभूत्, अत्र किल नलगिरिः दर्पात् स्तम्भम् उत्पाट्य उद्भ्रान्तः इति अभिज्ञः जनः आगन्तून् बन्धून् यत्र (विशालायां) रमयति ।

(३२) अत्र भाविकालंकारः । (म)

---

(31) Where, the breeze from the [river] Siprā, at day-break, lengthening the sharp notes of the cranes, sweet and indistinct (*kala*) through intoxication, fragrant (*kaṣāya*) owing to the contact [lit. friendship] with the perfume of the lotuses blossomed up, dispels the langour of women due to enjoyment, [and] agreeable to the touch [or, body], like a lover speaking gallantly, while preferring the request [for enjoyment].

[(32) Here did the Lord of the Vatsas carry off the beloved daughter of Pradyota; here was the golden garden of Tāla trees of the self-same king : here, it is reported, did [the elephant] Nalagiri wander about, having uprooted the [tying-] post through pride — thus do the well-informed people in which [Ujjayinī] regale [their] relatives come [there] on a visit.

हारांस्तारांस्तरलगुटिकान्कोटिशः शङ्खशुक्तीः
शष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहान् ।
दृष्ट्वा यस्यां विपणिरचितान्विद्रुमाणां च भङ्गा-
न्संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥ ३३ ॥]

CONSTRUE: यस्यां (विशालायां) तारान् तरलगुटिकान् हारान्, शङ्खशुक्तीः, शष्पश्यामान् उन्मयूखप्ररोहान् मरकतमणीन्, विद्रुमाणां च भङ्गान् कोटिशः विपणिरचितान् दृष्ट्वा सलिलनिधयः तोयमात्रावशेषाः संलक्ष्यन्ते ।

(३३) रत्नाकरादप्यतिरिच्यते रत्नसंपद्भिरिति भावः । (म)

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्तोपहारः ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथाः
पश्यन् लक्ष्मीं ललितवनितापादरागाङ्कितेषु ॥ ३४ ॥

CONSTRUE: जालोद्गीर्णैः केशसंस्कारधूपैः उपचितवपुः, भवनशिखिभिः बन्धुप्रीत्या दत्तनृत्तोपहारः, कुसुमसुरभिषु ललितवनितापादरागाङ्कितेषु अस्याः हर्म्येषु लक्ष्मीं पश्यन् अध्वखेदं नयेथाः ।

(३४) पश्यन् लक्ष्मीमिति पाठः । ... नीत्वा खेदमिति पाठे वक्ष्यमाणेन ' पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डेश्वरस्य ' इत्यनेन संबन्धः । (द)

---

(33) And on seeing in which [Ujjayinī] crores of bright necklaces with big precious stones as the central gem, conches, shells, emerald gems dark-green like grass, with rays shooting upwards, [and] pieces of corals, stocked in the shops [or market-places for sale], the oceans [lit. stores of water] are noticed [or, appear] as having only water remaining [in them].]

(34) With [your] body gaining in volume by the [lines of] incense [used] for hair-toilet, issuing forth from the latticed windows, with presents [in the form] of dancing offered [to you] by the domestic peacocks through brotherly love, you should remove the fatigue of the journey, witnessing the splendour in her [Ujjayinī's] mansions fragrant with flowers, bearing the imprints of [lit. marked with] the [red lac] dye on the feet of the charming ladies.

---

१ सुरभिष्वध्वखिन्नान्तरात्मा नीत्वा रात्रिं ललित...

भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य[1]।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडानिरत[2]युवतिस्नानतिक्तैर्मरुद्भिः ॥ ३५ ॥

CONSTRUE : भर्तुः कण्ठच्छविः इति गणैः सादरं वीक्ष्यमाणः (त्वं) त्रिभुवनगुरोः चण्डीश्वरस्य कुवलयरजोगन्धिभिः तोयक्रीडानिरतयुवतिस्नानतिक्तैः गन्धवत्याः मरुद्भिः धूतोद्यानं पुण्यं धाम यायाः ।

(३५.) तिक्तैः कटुकैः। अङ्गरागसंक्रमणात् । (व)

उज्जयिन्यां महाकालमिति किमपि देवतायतनमस्ति। तत्र परमेश्वरः सदा संनिधत्ते, सर्वेभ्यो वरांश्च ददातीति प्रसिद्धम् । तस्मात् त्रिभुवनगुरोरित्युक्तम्। चण्डेश्वरस्य, इदं महाकालनिकेतनेश्वरस्य देवस्याभिधानमिति केचित् । अन्ये रौद्राकारत्वाच्चण्डेश्वरपदं प्रयुक्तमिति वदन्ति। ...अत्रेदमनुसंधेयम्—पूर्वार्धे तु पुण्यं यायास्त्रिभुवनगुरोर्धाम इति धाम्नः पावनत्वमुक्तम्। उत्तरार्धे तु तस्यैव धाम्नः उद्यानादिमत्तया विलासास्पदत्वं चोक्तमिति। ननु कुवलयरजोगन्धिभिरित्यनेन गन्धवतीमरुतां गन्धवत्त्वमुक्तम्। पुनश्च कथं तोयक्रीडाभिरतयुवतिस्नानतिक्तैर्मरुद्भिरिति गन्धवत्त्वमुच्यत इति । उच्यते । विलासिनीनां शरीरसंस्कारहेतुना कुसुमादिना स्त्रीसंभोगसंमर्देन च उभयथा गन्धवत्त्वमास्त । तत्समाधिना मरुतामपि विशेषणमुक्तमिति। (द)

कुवलय...तोयक्रीडा...सौगन्ध्यातिशयार्थं विशेषणद्वयम् । (म)

अप्यन्यस्मिञ्जलधर महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति[3] भानुः।
कुर्वन्संध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥ ३६ ॥

---

(35) Being looked at, with respect by the Gaṇas [Śiva's hosts], because (*iti*) possessed of the lustre of the neck of [their] Lord [Śiva], you should repair to the holy temple [residence] of the Master of the three worlds, the Lord of Caṇḍī [Pārvatī], the garden of which is fanned (*dhūta*) by the breezes from the Gandhavatī [river], charged with the fragrance of the pollen of blue lotuses [and] fragrant with the bath [perfumery] of the young ladies engaged in water-sports.

(36) Even though reaching the Mahākāla at some other time, O cloud, you ought to stay [there] till the sun goes beyond the range of [your] eyes [that is, sets]; getting into the praiseworthy state of a drum [sounded] at the evening offering to Śiva, you would be obtaining the not incomplete fruit of [your] rumbling thunders.

---

१ चण्डेश्वरस्य। २ क्रीडाभिरत । ३ यावदभ्येति ।

CONSTRUE : (हे) जलधर, अन्यस्मिन् अपि काले महाकालम् आसाद्य यावत् भानुः नयनविषयम् अत्येति ते स्थातव्यम्; श्लाघनीयां शूलिनः संध्याबलिपटहतां कुर्वन् आमन्द्राणां गर्जितानाम् अविकलं फलं लप्स्यसे।

(३६) देवानां हि बलिकाले ढक्कापटहादिवाद्यैर्भाव्यम्। तत्र तु भवद्ध्वनितान्येव पटहा भविष्यन्तीति तत्साफल्यम्। (व)

महाकालनाथबलिपटहत्वेन विनियोगात्त गर्जितसाफल्यं स्यादित्यर्थः। (म)

पादन्यासक्वणितरशनास्तत्र लीलावधूतै
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः।
वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रबिन्दू-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान् ॥३७॥

CONSTRUE : तत्र पादन्यासक्वणितरशनाः, लीलावधूतैः रत्नच्छायाखचितवालिभिः चामरैः क्लान्तहस्ताः वश्याः त्वत्तः नखपदसुखान् वर्षाग्रबिन्दून् प्राप्य त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् आमोक्ष्यन्ते।

(३७) अयमभिप्रायः–महाकालं सेवित्वा सेवोपकरणानि तान्येव चामराणि धारयन्त्यः क्लान्तहस्ता देवदास्यस्तत्र बलिप्रदानसमये नृत्यन्ति। तासामुपरि सेवाक्लेशापहान् नखपदसुखान् वर्षप्रथमबिन्दून् भवान् यदि मुञ्चति ताश्चानन्यदुर्लभान् मधुकरश्रेणीदीर्घान् कटाक्षान् त्वय्यामोक्ष्यन्ति। आमोचनमिन्दीवरमालासमाधिनोक्तमिति। अन्ये त्वाहुः–'दुकूलदण्डिकामालाखड्गचामरगोलकैः। हस्तसंचारिभिः कुर्युर्नृत्तं तद्द् देशिकं मतम्॥' इति वचनात् चामराणि धारयन्त्य एव देशान्तरे नृत्तं कुर्वन्तीति। (द)

कामिनीदर्शनीयत्वलक्षणं शिवोपासनाफलं सद्यो लप्स्यस इति ध्वनिः। (म)

---

(37) There, the hetaera [courtesans], with [their] girdles jingling at the movements of the feet, [and] with [their] hands tired out by the Cāmaras waved about with grace and having [their] handles inlaid (*khacita*) with the lustre of gems, would, on securing from you the first rain-water-drops pleasing to the nail-marks, let go at you side-glances long [—stretched] like rows of bees.

---

१ रचित। २ नामोक्ष्यन्ति।

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ।
नृत्तारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥ ३८ ॥

CONSTRUE : पश्चात्, प्रतिनवजपापुष्परक्तं सान्ध्यं तेजः दधानः उच्चैः भुजतरुवनं मण्डलेन अभिलीनः, भवान्या शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिः (त्वं) पशुपतेः नृत्तारम्भे आर्द्रनागाजिनेच्छां हर ।

(३८) विद्युदुन्मेषाभावाच्छान्तोद्वेगानि निवृत्तखेदान्यत एव स्तिमितानि नयनानि यत्र दर्शने । (व)

भुजवनमिति वक्तव्ये तरुशब्दप्रयोगो मेघावतरणयोग्यत्वं सूचयति ।...भयंकरस्य गजाजिनस्यादर्शनाद् देव्या शान्त उद्वेगः । (द)

दृष्टं दृष्टा वा भक्तिर्यस्य स दृष्टभक्तिः सन् ...गजासुरमर्दनानन्तरं भगवान्महादेवस्तदीयमार्द्राजिनं भुजमण्डलेन बिभ्रत्ताण्डवं चकारेति प्रसिद्धिः । (म)

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा च भूर्विक्लवास्ताः ॥ ३९ ॥

CONSTRUE : तत्र (विशालायां) नक्तं रमणवसतिं गच्छन्तीनां योषितां सूचिभेद्यैः तमोभिः रुद्धालोके नरपतिपथे, कनकनिकषस्निग्धया सौदामन्या उर्वीं दर्शय, तोयोत्सर्गस्तनितमुखरः मा च भूः; ताः विक्लवाः ।

(३९) ...योषिताम् अभिसारिकाणामित्यर्थः । ...ता योषितो विक्लवा भीरवः । ततो वृष्टिगर्जिते न कार्ये इत्यर्थः । (म)

---

(38) Afterwards, clinging to in a circular way the tall forest of trees [in the form] of [Śiva's] arms, bearing the evening glow red like the fresh-blossomed Japā [flower], remove, at the commencement of the dancing, the longing for a wet elephant-hide on the part of Śiva [Lord of beings], with [your] devotion noticed by Bhavānī [Pārvatī] in a manner in which the eyes are motionless owing to [her] dejection having come to an end.

(39) There, when the Royal road has the vision obstructed by the [masses of] very dense [lit. fit to be pierced by a needle-point] darkness, point out the way [or, ground] to the women repairing at night to the residence of [their] lovers by [means of flashes of] lightning glistening like a gold-streak on a touch-stone ; but do *not* be noisy with thunder and down-pour of water ; [for] they [are surely] nervous [or, timid].

---

१ मा स्म भू... ।

तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ ४० ॥

CONSTRUE : चिरविलसनात् खिन्नविद्युत्कलत्रः भवान् सुप्तपारावतायां कस्यांचित् भवनवलभौ तां रात्रिं नीत्वा; सूर्ये दृष्टे पुनः अपि अध्वशेषं वाहयेत्; सुहृदाम् अभ्युपेतार्थकृत्याः न खलु मन्दायन्ते ।

(४०) पारावताः ते हि कण्ठरुतश्रवणार्थं नागरकैर्गृहे धार्यन्ते । (व)

विलसनशब्देन स्फुरणं विलासश्च विवक्षितः । (द)

सुप्ताः पारावताः कलरवा यस्यां तस्याम् । विविक्तायामित्यर्थः । ...जनसंचारस्तत्रासंभावित एवेति भावः । (म)

तस्मिन्काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।
प्रालेयास्रं कमलवदनात्सोऽपि हर्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥ ४१ ॥

CONSTRUE : तस्मिन् काले प्रणयिभिः खण्डितानां योषितां नयनसलिलं शान्तिं नेयम् अतः भानोः वर्त्म आशु त्यज; सः अपि (भानुः) नलिन्याः कमलवदनात् प्रालेयास्रं हर्तुं प्रत्यावृत्तः कररुधि त्वयि अनल्पाभ्यसूयः स्यात् ।

(४१) त्वयि कररुधि ...यस्य हि प्रियां प्रार्थयमानस्य यः करमवष्टभ्नीयात्तस्य तत्र मन्युर्भवति । (व)

---

(40) Having passed that night on some mansion-gallery with the pigeons asleep, with [your] wife, the lightning, fatigued owing to dangling about for a long time, you should once again, when the sun is seen, proceed on to the remaining part of [your] journey ; those who have bargained for carrying out the business of [their] friends, do not surely get slack [in their self-imposed tasks].

(41) At that time, are to be allayed the tears of disappointed women by [their] affectionate lovers—so shun the path of the sun quickly; he [the Sun] too, returning to remove the tears [in the form] of the dew from the face [in the form] of the lotus of the lotus-creeper, might [conceivably] be not a little enraged, when you would be obstructing [his] hands [rays] !

---

१ नयनात् ।

खण्डितानां, भर्तुरन्यासंगदर्शनादीर्ष्यालुः खण्डिता । ...त्वया प्राचीमुखे निरुद्धे प्रणयिनो रात्रिशङ्कया प्रभातेऽपि खण्डितानां प्रसादं न कुर्युः।...नलिन्याः खण्डिताया इत्येव । तस्याः खण्डितात्वं भानोर्देशान्तरगमनात् । (द)

अनल्पाभ्यसूयोऽधिकविद्वेषः स्यात् । प्रायेणेच्छाविशेषविघाताद् द्वेषो रोषविशेषश्च कामिनां भवतीति भावः । किंच 'ब्रह्माणं वार्कमीशानं विष्णुं वा द्वेष्टि यो जनः । श्रेयांसि तस्य नश्यन्ति रौरवं च भवेद् ध्रुवम् ॥' इति निषेधात्कार्यहानिर्भविष्यतीति ध्वनिः । (म)

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या
न्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥ ४२ ॥

CONSTRUE : गम्भीरायाः सरितः प्रसन्ने चेतसि इव पयसि प्रकृतिसुभगः ते छायात्मा अपि प्रवेशं लप्स्यते; तस्मात् अस्याः कुमुदविशदानि चटुलशफरोद्वर्तनप्रेक्षितानि धैर्यात् मोघीकर्तुं त्वं न अर्हसि ।

(४२) यश्च नागरः स प्रेयस्यां रागेण वीक्षमाणायां विलम्बते । स हि तस्याश्चेतसि प्रविष्टः । (व)

गम्भीराशब्देनोदात्तनायिका च प्रतीयते । छायात्मा प्रतिबिम्बात्मा । ...अनेन विशेषणेन परमात्मा प्रतिबिम्बं च ध्वन्यते । प्रकृतिसुभगः प्रकृत्या सुभगः, सांख्याभिमतस्य प्रकृत्याख्यस्य तत्त्वस्य संयोगेन सुभग इत्यर्थोऽपि ग्राह्यः । प्रसन्ने चेतसि प्रकृतिसुभगः परमात्मबिम्बः प्रतिफलतीत्यर्थोऽपि ध्वन्यत इत्यवगन्तव्यम् । (द)

नानुरक्ता विप्रलब्धव्येत्यर्थः । (म)

तस्याः किंचित्करधृतमिव प्राप्तवानीरशाखं
हृत्वा[1] नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ॥ ४३ ॥

---

(42) In the clear waters of the Gambhīrā river, as in the well-satisfied heart, would your reflected self also, naturally attractive, gain entrance; therefore you do not deserve to render futile, through stiffness, her glances [in the form] of the quick springings up of the Ṡaphara [fish], bright like [or with] lotuses.

(43) On removing her dark-blue water-garment slipped away from the bank-hips, as-though being held by [her] hand [because] resting on the branches of the canes—the start [or, departure] of you hanging over down, would take place, O friend, with great difficulty ; who conversant with the pleasure [or taste of love-enjoyment], [would be] strong [-minded enough] to abandon [a woman] with hips laid bare ?

---

१ नीत्वा ।

CONSTRUE: (हे) सखे, प्राप्तवानीरशाखं किंचित् करधृतम् इव मुक्तरोधोनितम्बं नीलं तस्याः (गम्भीरायाः) सलिलवसनं हृत्वा लम्बमानस्य ते प्रस्थानं कथम् अपि भावि; ज्ञातास्वादः कः विवृतजघनां विहातुं समर्थः।

(४३) अंशुकं हरतो हि कामिनो नार्यः कराभ्यां रुन्धन्ति। (व)

ज्ञातास्वादः ज्ञातस्त्रीसंभोगरसः। (द)

लम्बमानस्थ पीतसलिलभराल्लम्बमानस्य। अन्यत्र जघनारूढस्य। (म)

त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम्॥ ४४॥

CONSTRUE: त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्यः, दन्तिभिः स्रोतोरन्ध्रध्वनितसुभगं पीयमान; काननोदुम्बराणां परिणमयिता शीतः वायुः देवपूर्वं गिरिम् उपजिगमिषोः ते नीचैः वास्यति।

(४४) सुषिरे हि वातप्रवेशादधिको ध्वनिर्भवति। (व)

...वास्यति, तेन दीर्घाध्वगामिनस्ते वायुप्रेरणया श्रान्तिर्न भविष्यतीत्यभिप्रायः। (द)

वास्यति, त्वां वीजयिष्यतीत्यर्थः। ...'देवपूर्वं गिरिम्' इत्यत्र देवपूर्वत्वं गिरिशब्दस्य। न तु संज्ञिनस्तदर्थस्येति संज्ञायाः संज्ञित्वाभावादवाच्यवचनं दोषमाहुरालंकारिकाः। ...समाधानं तु देवशब्दविशेषितेन गिरिशब्देन शब्दपरेणार्थो मेघोपगमनयोग्यो देवगिरिर्लक्ष्यत इति कथंचित्संपाद्यम्। (म)

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः।
रक्षाहेतोर्नवशशिभृता वासवीनां चमूना-
मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः॥ ४५॥

---

(44) For you desirous of proceeding to the Devagiri [lit. Giri with [the word] 'Deva' preceding it], would be blowing gently [or, underneath], a cool breeze, charming on account of [its] contact with the odour of the earth emitting vapour [also, refreshed] owing to your down-pour, being drunk by the elephants charmingly owing to the grunting noise from the trunk, [and] the ripener of the forest-Udumbaras [figs].

(45) You forming yourself into a flower-cloud, should bathe Skanda [Kārtikeya] who has fixed [his] abode there, with showers of flowers wet with the waters of the heavenly Ganges; for, it [Skanda is] the majestic lustre, surpassing [that of] the Sun, placed by Śiva [the crescent-moon-bearer] in the mouth of Fire [the oblation-carrier], for the purpose of the protection of the armies belonging to Indra.

---

१ वातः।

CONSTRUE : पुष्पमेघीकृतात्मा भवान् व्योमगङ्गाजलार्द्रैः पुष्पासारैः तत्र नियतवसतिं स्कन्दं स्नपयतु; तत् (स्कन्दः) हि वासवीनां चमूनां रक्षाहेतोः नवशशिभृता हुतवहमुखे संभृतम् अत्यादित्यं तेजः।

(४५) वासवीनामिति दुर्लभः प्रयोगः। (व)

पुरा किल देवार्थमसुरान् निहत्य तत्र विश्रान्तः स्कन्दो देवैर्याचितः सन् तत्रैव मद्दर्शनायागताभ्यां शिवाभ्यां सह नित्यं वसामीति प्रतिज्ञातवान्। तस्मात्तत्र स्कन्दस्य नियतवसतित्वमुक्तमित्यैतिह्यमनुसंधेयम्। (द)

भवान्स्वयमेव स्नपयतु...स्वयंपूजाया उत्तमत्वादिति भावः। (म)

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलप्रापि[1] कर्णे करोति।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ॥ ४६ ॥

CONSTRUE : यस्य (मयूरस्य) ज्योतिर्लेखावलयि गलितं बर्हं भवानी पुत्रप्रेम्णा कर्णे कुवलयदलप्रापि करोति तं हरशशिरुचा धौतापाङ्गं पावकेः मयूरं पश्चात् अद्रिग्रहणगुरुभिः गर्जितैः नर्तयेथाः।

(४६) धौतापाङ्गं ...अनेन नर्तकस्य मुखमण्डनसमाधिश्च प्रतीयते। ...अनेन श्लोकेन शिवयोः संनिधानमुक्तमित्यनुसंधेयम्। (द)

गलितं भ्रष्टम्। न तु लौल्यात्स्वयं छिन्नमिति भावः। (म)

आराध्यैनं शरवणभवं[2] देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्य-
न्स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ॥ ४७ ॥

---

(46) Thereafter, should you cause to dance by [your] thunderings, deepened owing to being taken over by [that is, by the echo in the caves of] the mountain, that peacock of the son of Fire [that is, Skanda], with [his] corners of the eyes brightened by the lustre of the moon [on the forehead] of Śiva, whose dropped feather having circles of lines of lustre, does Bhavānī, out of affection for [her] son, place on [her] ear, so as to make it reach the blue lotus-petal.

(47) Having worshipped this god [Skanda] born in the thicket of reeds, should you, going over some way, with [your] path kept free by the Siddha pairs holding lutes, through fear of the drops of water [damaging their lutes], keep hanging on, showing regard for Rantideva's fame arising out of the [sacrificial] slaughter of Surabhi's daughters [that is, cows] and taking shape on the earth in the form of a river.

---

१ दलक्षेपि। पद्मापि। २ आराध्यैवं शरवणभुवं।

CONSTRUE : एनं शरवणभवं देवम् आराध्य वीणिभिः सिद्धद्वन्द्वैः जलकणभयात् मुक्तमार्गः उल्लङ्घिताध्वा सुरभितनयालम्भजां भुवि स्रोतोमूर्त्या परिणतां रन्तिदेवस्य कीर्तिं मानयिष्यन् व्यालम्बेथाः ।

(४७) तेन हि नृपेण क्रतुष्वतिबंह्वीयस्यो गावः संज्ञपिता यासां रुधिराच्चर्मभ्यश्च चर्मण्वती संपन्नेत्यागमः। (व)

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥ ४८ ॥

CONSTRUE : शार्ङ्गिणः वर्णचौरे त्वयि जलम् आदातुम् अवनते (सति) गगनगतयः नूनं दृष्टीः आवर्ज्य तस्याः सिन्धोः पृथुम् अपि दूरभावात् तनुं प्रवाहम् एकं स्थूलमध्येन्द्रनीलं भुवः मुक्तागणम् इव प्रेक्षिष्यन्ते ।

(४८) दूराद्धि महदपि स्वल्पं दृश्यते । अत एव मुक्तागुणसारूप्यम् । (व)

अत्रात्यनन्तनीलमेघसंगतस्य प्रवाहस्य भूकण्ठमुक्तागुणत्वेनोत्प्रेक्षणादुत्प्रेक्षैवेयमितीव-शब्देन व्यज्यते । निरुक्तकारस्तु 'तत्र तत्रोपमा यत्र इवशब्दस्य दर्शनम्' इतीवशब्द-दर्शनादत्राप्युपमैवेति बभ्राम । (म)

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम् ॥ ४९ ॥

---

(48) When you, the stealer of Kṛṣṇa's complexion would be bending down [to the river] to take up water, the sky-movers [Siddhas, etc.] would surely be looking, turning [their] eyes, on the current of that river [looking] thin owing to [its] being at a distance, although broad, as though it was a single neck-lace of pearls of the Earth, with a big sapphire in the centre.

(49) Having crossed that [Carmaṇvatī river], move on, making your round form the object of curious eyes [lit. the curiosities of the eyes] of the ladies of Daśapura, familiar with the sportive movements of the creeper-like eye-brows, with [their] dark and variegated splendours flashing above owing to the lifting up of the eye-lashes, [and] stealing [that is, resembling] the beauty of the bees following the Kunda [flowers] tossed about.

---

१ दूरमावर्ज्यं ।

CONSTRUE: तां (चर्मण्वतीम्) उत्तीर्य परिचितभ्रूलताविभ्रमाणां पक्ष्मोत्क्षेपात् उपरिविलसत्कृष्णशारप्रभाणां कुन्दक्षेपानुगमधुकरश्रीमुषां दशपुरवधूनेत्रकौतूहलानाम् आत्मबिम्बं पात्रीकुर्वन् व्रज ।

(४९) यद्यपि कौतूहलविशेषणान्येतानि तथापि वस्तुबलात्तद्गतां नेत्राणामेवैते गुणाः । (व)

अत्र पृथगेव कृष्णशब्दोपादानात् शारशब्दः सितरक्तवर्णयोः सांकर्ये संकुचितवृत्तिः । (द)

शारशब्दादेव सिद्धे कार्ष्ण्ये पुनः कृष्णपदोपादानं कार्ष्ण्यप्राधान्यार्थम् । रक्तत्वं तु न विवक्षितमुपमानानुसारात्तस्य स्वाभाविकस्य स्त्रीनेत्रेषु सामुद्रिकविरोधादितरस्याप्रसंगात् । (म)

> ब्रह्मावर्तं जनपदमथ च्छायया गाहमानः
> क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः ।
> राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
> धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥ ५० ॥

CONSTRUE: अथ ब्रह्मावर्तं जनपदं छायया गाहमानः क्षत्रप्रधनपिशुनं तत् कौरवं क्षेत्रं भजेथाः, यत्र गाण्डीवधन्वा शितशरशतैः राजन्यानां मुखानि धारापातैः कमलानि त्वम् इव अभ्यवर्षत् ।

(५०) ब्रह्मावर्त इति...अत्र मनुः–' सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥' इति । ... छायया गाहमानः, अनेन तस्य पुण्यदेशत्वात् स्वरूपेणाक्रमणं न युक्तमिति सूचितम् । (द)

> हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
> बन्धुस्नेहात् समरविमुखो लाङ्गली याः सिषेवे ।
> कृत्वा तासामभिगममपां सौम्य सारस्वतीना-
> मन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥ ५१ ॥

---

(50) Then, plunging into the Brahmāvarta country by [your] shadow, you should take to that [well-known [region of the Kurus [Kurukṣetra], indicative of the massacre of the Kṣatriyas, where Arjuna [whose bow is the Gāṇḍīva] showered over the faces of the Kṣatriya warriors [or princes] hundreds of sharp arrows, like you [pouring] over the lotuses, pelting showers.

(51) Having arrived at [or, established contact with] those waters of the Sarasvatī, O gentle one, which the plough-bearer [Balarāma] averse to [taking part in the] fight out of affection for [his] relatives, took to, renouncing liquor of agreeable flavour and marked with the [reflections of the] eyes of Revatī, you too would become pure inside, dark only in complexion.

---

१ पदमधश्छायया । २ कमलान्यभ्यपिञ्चन्मु । ३ बन्धुप्रीत्या । ४ तासामधिगम। ५ त्वमसि ।

CONSTRUE: अभिमतरसां रेवतीलोचनाङ्कां हालां हित्वा बन्धुस्नेहात् समरविमुखः लाङ्गली याः (सारस्वतीः अपः) सिषेवे तासां सारस्वतीनाम् अपाम् अभिगमं कृत्वा (हे) सौम्य, त्वम् अपि अन्तःशुद्धः वर्णमात्रेण कृष्णः भविता।

(५१) हालात्यागेन नियमग्रहणं तीर्थसेवने प्रतिपादयति। (व)

यद्यपि प्रकृत्या पुण्यं कुरुक्षेत्रं तथापि यस्मिन् प्रदेशे युद्धमासीत् तं नरशिरःकपालादिदूषितं प्राप्य कथमशुद्धो न भविष्यामीत्याशङ्क्याह हित्वा ...। बन्धुस्नेहाद् धर्मपुत्रादिषु दुर्योधनादिषु च तुल्यत्वेन वर्तमानादित्यर्थः।...लाङ्गली ... अनेन सायुधोऽपि बन्धुस्नेहात् समरविमुख इत्यवगम्यते। (द)

अन्तःशुद्धिरेव संपाद्या न तु बाह्या। बहिःशुद्धोऽपि सूतवधप्रायश्चित्तार्थं सारस्वतसलिलसेवी तत्र भगवान् बलभद्र एव निदर्शनम्। अतो भवतापि सरस्वती सर्वथा सेवितव्येति भावः। (म)

तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम्।
गौरीं वक्त्रेभ्रुकुटिरचनां या विहस्येव फेनैः
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता॥ ५२॥

CONSTRUE: तस्मात् अनुकनखलं शैलराजावतीर्णां सगरतनयस्वर्गसोपानपङ्क्तिं जह्नोः कन्यां गच्छेः, या (जह्नोः कन्या) वक्त्रेभ्रुकुटिरचनां गौरीं फेनैः विहस्य इन्दुलग्नोर्मिहस्ता शम्भोः केशग्रहणम् अकरोत् इव।

(५२) केशग्रहण...करेण हि केशाकर्षणं क्रियते। मत्संनिधावेवानया केशा गृह्यन्त इति गौर्या भ्रुकुटिबन्धः। केशेषु धारणाद्गङ्गायाः केशग्राहित्वम्। सा हि स्वर्गात्पतन्ती हरेण जटाग्रे धृतेत्यागमः। (व)

कनखल इति गङ्गाद्वारे कोऽपि पर्वतः। तथा महाभारते—'...पुण्यः कनखलस्तथा। पर्वतश्च पुरुर्नाम यत्र जातः पुरूरवाः॥' इति।...केशग्रहणम्, अनेन केशेष्ववस्थानं बलात्कारेण केशग्रहणं च विवक्षितम्। ...अयमभिप्रायः—आवयोर्द्वयोरपि शैलराजप्रभवत्वे साधारणे त्वं शम्भोरर्धहरासि। अहं तु तस्य मूर्धन्यवस्थानं कृतवतीति केशग्रहणदर्शनकुपितां गौरीं फेनव्याजेन हसन्तीव या विभातीत्यर्थः। (द)

---

(52) From thence, you should go to the daughter of Jahnu [that is, the Ganges], descended from the Himālaya [the Lord of mountains] near Kanakhala, [and] the flight of steps to heaven for the sons of Sagara, who, as though laughing at Gaurī who had formed a knitting of the eye-brow on [her] face, by her [masses of] foam, grasped the hair of Śiva, with [her] hands [in the form] of waves clinging on to the moon!

---

१ गौरीवक्त्रभ्रुकुटि।

शंभोः केशग्रहणमकरोत् । यथा काचित् प्रौढा नायिका सपत्नीमसहमाना स्ववालभ्यं प्रकटयन्ती स्वभर्तारं सह शिरोरत्नेन केशेष्वाकर्षति तद्वादिति भावः । इदं च पुरा किल भगीरथप्रार्थनया भगवतीं गगनपथात्पतन्तीं गङ्गां गङ्गाधरो जटाजूटेन जग्राहेति कथामुपजीव्योक्तम् । (म)

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।
संसर्पन्त्या सपदि भवतः स्रोतसि च्छाययासौ
स्यादस्थानोपगतयमुनासंगमेवाभिरामा ॥ ५३ ॥

CONSTRUE : व्योम्नि पश्चार्धलम्बी सुरगजः इव अच्छस्फटिकविशदं तस्याः अम्भः तिर्यक् पातुं त्वं तर्कयेः चेत्, सपदि स्रोतसि संसर्पन्त्या भवतः छायया असौ (गङ्गा) अस्थानोपगतयमुनासंगमा इव अभिरामा स्यात् ।

(५३) अस्थानोपगत...प्रयागादन्यत्रापि संपन्नकालिन्दीसमागमा...त्वत्प्रतिबिम्बस्य यमुनाकारत्वात् । (व)

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शुभ्रां[2] शोभां त्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥ ५४ ॥

CONSTRUE : आसीनानां मृगाणां नाभिगन्धैः सुरभितशिलं तस्याः (गङ्गायाः) एव प्रभवं तुषारैः गौरम् अचलं प्राप्य, अध्वश्रमविनयने तस्य शृङ्गे निषण्णः (त्वं) त्रिनयनवृषोत्खातपङ्कोपमेयां शुभ्रां शोभां वक्ष्यसि ।

---

(53) If you, like a heavenly [quarter–] elephant, hanging on by [your] hinder part in the sky, make up [your] mind to drink in a slanting manner, her water white like pure [or transparent] crystal, she [the Ganges] on account of your image suddenly proceeding through [her] stream, would become charming, as though having a union with the Jumna brought about at a wrong place [that is, other than Prayāga].

(54) Having reached the mountain [Himālaya], the source of that [river] itself, with [its] rocks rendered fragrant by the musk–smell of the [musk-] deer sitting [on them],[and] white with snow, you, resting on [its] peak for the purpose of removing [your] fatigue of the journey, would possess a white lustre comparable to the mud dug up by the bull [Nandi] of the three–eyed God [Siva].

---

१ पूर्वार्ध । २ शोभां शुभ्रत्रिनयन ।

(५४) तुहिनशीतलत्वाच्च शृङ्गस्य मार्गखेदनिवर्तकत्वम् । (व)

कामपि वधूं भुक्त्वा तस्या एव जन्मगृहे गन्धादिभिः श्रममपहरतो जामातुः कान्तिरत्र ध्वन्यते । (द)

तस्याः प्रभवमित्यादिना हिमाद्रौ मेघस्य वैवाहिको गृहविहारो ध्वन्यते । (म)

तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै-
रापन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ॥ ५५ ॥

CONSTRUE : वायौ सरति (सति) सरलस्कन्धसंघट्टजन्मा उल्काक्षपितचमरीबालभारः दवाग्निः तं (हिमाद्रिं) बाधेत चेत्, एनं (दवाग्निं) वारिधारासहस्रैः अलं शमयितुम् अर्हसि; उत्तमानां संपदः हि आपन्नार्तिप्रशमनफलाः ।

(५५) हिमजलस्वरूपत्वात् तस्य हिमवतः किमग्निना व्यसनमित्यपेक्षायामाह उल्काक्षपित...। (द)

ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मि-
न्मुक्ताध्वानं[2] सपदि शरभा लङ्घयेयुर्भवन्तम् ।
तान्कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णा-
न्के वा न स्युः परिभव[3]फला निष्फलारम्भयत्नाः ॥ ५६ ॥

CONSTRUE : तस्मिन् (हिमाद्रौ) संरम्भोत्पतनरभसाः ये शरभाः मुक्ताध्वानं भवन्तं सपदि स्वाङ्गभङ्गाय लङ्घयेयुः तान् तुमुलकरकावृष्टिपातावकीर्णान् कुर्वीथाः; निष्फलारम्भयत्नाः के वा परिभवफलाः न स्युः ।

---

(55) If, when the wind is blowing, the wild fire generated by the clashing against of the branches of the Sarala trees, destroying by [its] flames the abundant tails of the Camarīs, should damage it [the Himālaya], it behoves you [lit. you deserve] to extinguish it fully (*alam*) by means of thousands of showers of water; for, the riches of the noblest have for [their] fruit the allaying of the suffering of the distressed.

(56) Those Sarabhas there who might be suddenly confronting you keeping out of [their] path, impetuously flying up in anger, towards the breaking up of [their] own bodies—make them scattered away by heavy pelting hail-showers; who indeed attempting fruitless tasks, would not have defeat [or, contempt] for [their] deserts !

---

१ त्वां मुक्तध्वनिमसहनाः कायभङ्गाय । २ दर्पोत्सेकादुपरि शरभा लङ्घयिष्यन्त्यलङ्घ्यम् । ३ परिभवपदं निष्फला...

(५६) त्वदाक्रमणेच्छा शरभाणां निष्फला । तव ग्रहीतुमशक्यत्वात् । (व)

निष्फला आरम्भयत्नाश्चेति कर्मधारयः।...यद्वा निष्फला इति पदच्छेदः। निष्फला अफलाः । रम्भयत्नाः संरम्भयत्नाः। (द)

शरभा अष्टापदमृगविशेषाः ।...यदत्र ' घनोपलस्तु करकः ' इति यादववचनात्करकशब्दस्य नियतपुंलिङ्गताभिप्रायेण ' करकाणामवृष्टिः ' इति केषांचिद्व्याख्यानं तदन्ये नानुमन्यन्ते ।...यादवस्य तु पुंलिङ्गताविधाने तात्पर्यं न तु स्त्रीलिङ्गतानिषेध इति न तद्विरोधोऽपि । (म)

तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः
शश्वत्सिद्धैरुपहृतबलिं भक्तिनम्रः परीयाः ।
यस्मिन्दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः
कल्पिष्यन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५७ ॥

CONSTRUE : तत्र (हिमाद्रौ) दृषदि व्यक्तं शश्वत् सिद्धैः उपहृतबलिम् अर्धेन्दुमौलेः चरणन्यासं भक्तिनम्रः (सन्) परीयाः, यस्मिन् (चरणन्यासे) दृष्टे उद्धूतपापाः श्रद्दधानाः करणविगमात् ऊर्ध्वं स्थिरगणपदप्राप्तये कल्पिष्यन्ते ।

(५७) अनश्वराः प्रमथाः संपद्यन्ते । (व)

हिमवतः कस्यांचिच्छिलायां रुद्रपादन्यासो विद्यत इति प्रसिद्धम्। शश्वत् सिद्धैः... अनेन ज्ञानोपायः सूचितः। परीयाः...प्रदक्षिणं कुर्वीथा इत्यर्थः। (द)

' अव्यक्तं व्यञ्जयामास शिवः श्रीचरणद्वयम् । हिमाद्रौ शाम्भवादीनां सिद्धये सर्वकर्मणाम् ॥ दृष्ट्वा श्रीचरणन्यासं साधकः स्थिरयेत्तनुम् । इच्छाधीनशरीरो हि विचरेच्च जगत्त्रयम् ॥' इति शम्भुरहस्ये । (म)

---

(57) There, you bowing down in devotion, should circumambulate the foot-print of [Śiva] having the crescent-moon on [his] head, distinctly manifested on a stone there, to which offerings are brought constantly by the Yogins [or Siddhas, demigods], on seeing which those who have faith, with [their] sins completely shaken off, would be destined, after the falling off of the body, for the attainment of the eternal status of Gaṇas [of Śiva].

---

१ रुपचित... । २ कल्पन्तेऽस्य । संकल्पन्ते ।

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संरक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः ।
निर्ह्रादी ते मुरज इव चेत्कन्दरेषु ध्वनिः स्या-
त्संगीतार्थो ननु पशुपतेस्तत्र भावी समस्तः ॥ ५८ ॥

CONSTRUE : अनिलैः पूर्यमाणाः कीचकाः मधुरं शब्दायन्ते; संरक्ताभिः किन्नरीभिः त्रिपुरविजयः गीयते; कन्दरेषु ते ध्वनिः मुरजे इव निर्ह्रादी स्यात् चेत् तत्र पशुपतेः संगीतार्थः ननु समस्तः भावी ।

(५८) संगीतं नाम प्रेक्षणीयनृत्तगीतवाद्यात्मकं त्रयम् । ...पशुपतेर्नृत्यतस्तत्र पूर्ण इति पाठः। पशुपतेस्तत्र भावी समग्रः इति पाठे तु नृत्तानुपादानात् संगीतार्थः पूर्णो न स्यात् । अन्ये तु संगीतार्थो ननु पशुपतेस्तत्र भावी समस्त इति पठन्ति । पादन्या-समन्तरेण स्वरूपेणापि पशुपतिस्तत्र वसतीति प्रसिद्धम् । (द)

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषा-
न्हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो बलिनियमनेऽभ्युद्यतस्येव विष्णोः ॥ ५९ ॥

CONSTRUE : प्रालेयाद्रेः उपतटं तान् तान् विशेषान् अतिक्रम्य हंसद्वारं भृगुपातियशोवर्त्म यत् क्रौञ्चरन्ध्रम् तेन बलिनियमने अभ्युद्यतस्य विष्णोः श्यामः पादः इव तिर्यगायामशोभी (त्वम्) उदीचीं दिशम् अनुसरेः ।

हंसद्वारं हंसानां मानसाख्यसरोगमनद्वारम् । ...स्कन्देन क्रौञ्चारातिना स्पर्धमानः परशुरामः क्रौञ्चाचलं शरेण सरन्ध्रमकरोत् । तेन तस्य महती कीर्तिरासीत् । तस्माद् भृगुपतियशोवर्त्मेत्युक्तम् । (द)

---

(58) The bamboos being filled with [gusts of] wind, produce noise in a sweet manner; the victory over Tripura is sung by the Kinnara ladies full of passion [or, sweet-voiced]; if there be your [thundering] noise in the caves, resounding as in the case of a drum, there would indeed be a complete complement for the musical concert of Śiva there.

(59) Having gone beyond the various objects of note nearby the slopes of the Himālaya, you appearing to advantage by [your] oblique length [of form], should proceed to the north by that Krauñca defile [which is] the gate for the swans [to go to the Mānasa lake] [and which is] the path of the glory of Paraśurāma [the foremost among the Bhṛgus], like the dark foot of Viṣṇu got ready for the pounding down of Bali.

---

१ संसक्ताभि...। २ मुरव । ३ पशुपतेर्नृत्य-स्तत्र पूर्णः । ४ समग्रः । ५ विमथनाभ्युद्यतस्येव ।

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः॥ ६०॥

CONSTRUE : ऊर्ध्वं च गत्वा दशमुखभुजोच्छ्वासितप्रस्थसंधेः त्रिदशवनितादर्पणस्य कैलासस्य अतिथिः स्याः, यः (कैलासः) कुमुदविशदैः शृङ्गोच्छ्रायैः खं वितत्य प्रतिदिनं राशीभूतः त्र्यम्बकस्य अट्टहासः इव स्थितः।

(६०) त्रिदशवनितादर्पणस्य, ननु इदं विशेषणमयुक्तं मेघवातस्पर्शाद् दर्पणस्यान्धीभावात्। ...अस्य परिहारः–कैलासस्य महत्तया मालिन्यं न संभवतीति। (द)

...प्रस्थसंधेः। एतेन नयनकौतुकसद्भाव उक्तः।...दर्पणस्य। कैलासस्य स्फटिकत्वाद्रजतत्वाद्वा बिम्बग्राहित्वेनेदमुक्तम्।...त्रिलोचनस्याट्टहासो...धावल्याद्धासत्वेनोत्प्रेक्षा। हासादीनां धावल्यं कविसमयसिद्धम्। (म)

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यःकृत्तद्विरदरदनच्छेदगौरस्य तस्य।
लीलामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री-
मंसन्यस्ते सति हलभृतो मेचके वाससीव॥ ६१॥

CONSTRUE : स्निग्धभिन्नाञ्जनाभे त्वयि तटगते (सति) सद्यःकृत्तद्विरदरदनच्छेदगौरस्य तस्य अद्रेः मेचके वाससि अंसन्यस्ते सति हलभृतः इव स्तिमितनयनप्रेक्षणीयां लीलां भवित्रीम् उत्पश्यामि।

(६१) श्रौती पूर्णोपमालंकारः। (म)

---

(60) Having gone further up, be [you] the guest of the Kailāsa [mountain] with [its] peak-joints pulled up by the arms of Rāvaṇa [the ten-mouthed one], the looking glass for the heavenly damsels, which has stood over-spreading the sky with [its] lofty peaks white like lotuses, as though the loud laughter of the three-eyed God [Śiva] gathered into a heap day by day !

(61) When you resembling glistening and powdered collyrium would be staying on [its] slopes, I foresee the grace of that mountain white like a piece of elephant's tusk freshly cut, becoming fit to be gazed at with eyes fixed, like [that] of the Plough–bearer [Balarāma] when [his] dark garment is placed on [his] shoulder.

---

१ प्रतिनिशमिव। २ शोभामद्रेः।

तस्मिन्हित्वा भुजगवलयं शम्भुना दत्तहस्ता
क्रीडाशैले यदि च विहरेत्पादचारेण गौरी।
भङ्गी भक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानत्वं कुरु मणितटारोहणायाग्रचारी ॥ ६२ ॥

CONSTRUE : तस्मिन् क्रीडाशैले भुजगवलयं हित्वा शम्भुना दत्तहस्ता गौरी पादचारेण च विहरेत् यदि, अग्रचारी स्तम्भितान्तर्जलौघः भङ्गी भक्त्या विरचितवपुः (त्वं) मणितटारोहणाय सोपानत्वं कुरु।

(६२) भयंकरत्वादेव नीलं सर्पकटकं हित्वा। (व)

भुजगवलयोत्सारणं देव्यास्त्रासाभावाय। ...मणिग्रहणं मेघस्य नीलवर्णत्वात् तट-सोपानयोरेकवर्णत्वं सूचयितुं कृतम्। (द)

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम्।
ताभ्यो मोक्षो यदि तव सखे घर्मलब्धस्य न स्या-
त्क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भीषयेस्ताः ॥ ६३ ॥

CONSTRUE : तत्र अवश्यं सुरयुवतयः वलयकुलिशोद्घट्टनोद्गीर्णतोयं त्वां यन्त्रधारागृहत्वं नेष्यन्ति; (हे) सखे, घर्मलब्धस्य तव ताभ्यः मोक्षः यदि न स्यात् (तदा) क्रीडालोलाः ताः श्रवणपरुषैः गर्जितैः भीषयेः।

(६३) ग्रीष्मे हि संतापनिवारणायाढ्या धारागृहान्कुर्वते। (व)

घर्मलब्धस्य ...ननु वर्षाकालो वर्तते। कथं घर्मकाललाभः। देवभूमित्वात् कैलासे षड्ऋतवः सर्वदा वर्तन्ते। ...अथवा घर्मशब्देन श्रमो विवक्षितः। (द)

घर्मलब्धत्वं चास्य देवभूमिषु सर्वदा सर्वर्तुसमाहारात्प्राथमिकमेघत्वाद्वा। (म)

---

(62) And if on that pleasure-mountain, should Gaurī be sporting about on foot, supported by the hand [lit. with the hand being given] by Śiva throwing off [his] serpent-bracelet, make you, moving in front [of her], forming [your] ody [so as] to possess coils, through devotion, with the internal mass of water controlled, a flight of steps [for her] to ascend the jewelled slopes.

(63) There, undoubtedly, would the heavenly damsels transform you into a shower-bath, with the water thrown out owing to the striking against of the thunder-bolt-like bracelets; if there could be no release from them of you secured [by them] in the hot season, you should frighten them longing for sport by [your] thunderings harsh to the ear.

---

१ हित्वा तस्मिन्। हित्वा नीलं २...न्तजलोऽस्याः। ३ सोपानं त्वं कुरु...णायाग्रयायी। ४ सुखपदस्पर्शमारोहणेषु। ५ जनितसलिलोद्गारमन्तःप्रवेशात्। ६ मोक्षस्तव यदि...गर्जितैर्भाययेस्ताः।

हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन्कामं क्षणमुखपटप्रीतिमैरावणस्य ।
धुन्वन्कल्पद्रुमकिसलयान्यंशुकानि[1] स्ववातै-
र्नानाचेष्टैर्जलद ललितैर्निर्विशेस्तं नगेन्द्रम्[2] ॥ ६४ ॥

CONSTRUE : (हे) जलद, मानसस्य हेमाम्भोजप्रसवि सलिलम् आददानः, ऐरावणस्य क्षणमुखपटप्रीतिं कामं कुर्वन्, कल्पद्रुमकिसलयानि अंशुकानि स्ववातैः धुन्वन् नानाचेष्टैः ललितैः तं नगेन्द्रं निर्विशेः ।

(६४) गजा हि मुखपटेन प्रीयन्ते । (व)

क्षणमुखपटप्रीतिं, क्षणग्रहणं सलिलदानमुहूर्तविवक्षायाम् । ...कश्चित् सखा स्वप्रियसखस्य गृहं गत्वा तदीयानि वापीवाहनारामादीनि स्वैरं निर्विशतीत्यर्थो ध्वन्यते इति । (द)

तथैरावतस्येन्द्रगजस्य । कामचारित्वाद्वा शिवसेवार्थमिन्द्रागमनाद्वा समागतस्येति भावः । ...यथेच्छविहारो मित्रगृहेषु मैत्र्याः फलम् । सहजामित्रं च ते कैलासः । (म)

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमाना[3]
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६५ ॥

CONSTRUE : प्रणयिनः इव तस्य उत्सङ्गे स्रस्तगङ्गादुकूलां अलकां दृष्ट्वा (हे) कामचारिन्, त्वं पुनः न ज्ञास्यसे (इति) न, उच्चैर्विमाना या (अलका) वः काले सलिलोद्गारम् अभ्रवृन्दं कामिनी मुक्ताजालग्रथितम् अलकम् इव वहति ।

---

(64) Taking up the water of the Mānasa [lake] generating golden lotuses, conferring at will the pleasure of [possessing] a face-cloth for a moment, on Airāvaṇa, shaking off by your breezes the silken garments, the sprouts of the wish-fulfilling tree—with [such like] amusements of various movements, you should enjoy that lord of mountains.

(65) O wanderer-at-will, on seeing [the city of] Alakā with [its] silken garment, the Ganges, slipped off, on its slope, as on a lover's lap, [it is] not that you would not indeed be recognising [it], which [Alakā] with [her] lofty seven-storied mansions, bears in your [proper] season a mass of clouds pouring forth water, like a noble woman free from pride [her] curly hair wreathed with strings of pearls.

---

१ ...शुकानीव वातैः । २ धुन्वन्वातैः सजलपृषतैः कल्पवृक्षांशुकानि च्छायाभिन्नः स्फटिकविशदं निर्विशेः पर्वतं तम् । ३ ...मानैर्मुक्ता-

(६५) सलिलस्य मुक्ताजालमुपमानम् । अग्राणां ललाटकेशाः । (व)

कामचारिन्, अनेन सर्वचारित्वं कामुकत्वं च विवक्षितम् । ...सप्तभूमिकं भवनं विमानम् । ...प्रोषिता उद्दात्ताः पुरुषाः वर्षाकाले समागत्य विगतमाना भूत्वा स्त्रीणां कपोललम्बानलकान् मुक्ताजालैरुद्गृह्य बध्नन्तीत्यर्थो विवक्षितः । (द)

अत्र कैलासस्यानुकूलनायकत्वमलकायाश्च स्वाधीनपतिकाख्यनायिकात्वं ध्वन्यते (म)

(उत्तरमेघः)

विद्युत्वन्तं-ललितवनिताः सेन्द्रचापं सचित्राः
संगीताय प्रहतमुरजाः स्निग्धपर्जन्यघोषम्[1] ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ ६६ ॥

CONSTRUE : यत्र (अलकायां) ललितवनिताः सचित्राः संगीताय प्रहतमुरजाः मणिमयभुवः अभ्रंलिहाग्राः प्रासादाः, विद्युत्वन्तम् सेन्द्रचापं स्निग्धपर्जन्यघोषम् अन्तस्तोयं तुङ्गं त्वां तैः तैः विशेषैः तुलयितुम् अलम् ।

(६६) अत्र मेघगर्जितवाचिनः पर्जन्यशब्दस्य प्रयोगेणैव सिद्धेऽप्यर्थे घोषशब्द-प्रयोगः ' केकारवैर्बर्हिण ' इत्यत्र केकारववत् सोढव्यः ।...पूर्वोक्तानां विशेषाणां समास-वृत्तितिरोहितत्वात् स्पष्टार्थं तैस्तैर्विशेषैरित्युक्तम् । अत्र मेघसंबन्धः स्पष्टः । (द)

अत्रोपमानोपमेयभूतमेघप्रासादधर्माणां विद्युद्वनितादीनां यथासंख्यमन्योन्यसादृश्या-न्मेघप्रासादयोः साम्यसिद्धिरिति बिम्बप्रतिबिम्बभावेनेयं पूर्णोपमा । (म)

हस्ते लीलाकमलमलकं बालकुन्दानुविद्धं[3]
नीता लोध्रप्रसवरजसा पाण्डुतामाननश्रीः[4] ।
चूडापाशे नवकुरवकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ ६७ ॥

---

(66) [The city of Alakā] where the mansions possessing charming ladies, with pictures [in various colours], with drums sounded deep for [the purpose of the] musical concert, with floors made of gems [and] with [their] tops touching the sky, [are] quite competent by various special features to make light of [or, to stand comparison with] you possessing the lightning, with the rain-bow, with deep thunder-noise, with water inside [and] lofty.

(67) Where [in the case] of ladies [there is] a lotus for play in the hand; the interweaving of young Kunda [flowers] in the curly hair; the beauty of the face rendered pale-white by the pollen of Lodhra flowers; fresh Kurabaka [flower] in the luxuriant hair on the head; the charming Sirīṣa [flower] on the ear and the Nīpa [flower] sprung at your advent at the parting of the hair.

---

१ संगीतार्थंप्रहतमुरवाः ।२ स्निग्धगम्भीरघोषम् ।३...कुन्दानुवेधो । ४...मानने श्रीः ।

CONSTRUE : यत्र (अलकायां) वधूनां हस्ते लीलाकमलम्, अलके बालकुन्दानुविद्धम्, लोध्रप्रसवरजसा पाण्डुतां नीता आननश्रीः, चूडापाशे नवकुरबकम्, कर्णे चारु शिरीषम्, सीमन्ते च त्वदुपगमजं नीपम् ।

(६७) यत्र चाङ्गनानामिदमिदमृतुषट्कजातमग्राम्यमाभरणम् । ...तदेतेन तथाभूतेन कनकालंकारनिरासेन नागरत्वमङ्गनानामुक्तम् । (व)

अनेन श्लोकेन शरद्धेमन्तशिशिरवसन्तग्रीष्मप्रावृषां षण्णामृतूनां लिङ्गभूतैरसाधारणैः पुष्पैरलकायां युगपदेव प्रवृत्तिरुक्ता । तद्यथा–...शरल्लिङ्गेन कमलेन शरत्कालस्य संनिधिः ...। अलकं बालकुन्दानुविद्धमित्यपपाठः। अलकशब्दस्य पुंल्लिङ्गत्वात् । अलके...इति पाठः। अस्मिन्पाठे रीतिभङ्गश्च न भवति। कुन्देन हेमन्तसंनिधिरुक्तः।...हेमन्तशिशिरयोर्द्वयोरपि लिङ्गं कुन्दम् । हेमन्ते प्रादुर्भवति शिशिरे प्रौढीभवतीति विशेषः । अत एव बालकुन्दानुवेध इति बालशब्दः प्रयुक्तः ।...लोध्रपुष्पं हि शिशिरस्य लिङ्गम् ।...नवकुरबकं हि वसन्तलिङ्गम् ।...शिरीषं हि ग्रीष्मस्य लिङ्गम् ।...त्वदुपगमजमित्यनेन नीपस्य वर्षालिङ्गत्वं प्रतीयते ।...त्वदुपगमजं यत्र नीपमिति मेघसंबन्ध उक्तः । (द)

' अलकम् ' इति प्रथमान्तपाठे सप्तमीप्रक्रमभङ्गः स्यात् । नाथस्तु नियतपुंल्लिगताहानिश्चेति दोषान्तरमाह । तदसत् । ' स्वभाववक्राण्यलकानि तासाम् ' ' निर्धूतान्यलकानि... ' इत्यादिषु प्रयोगेषु नपुंसकलिङ्गतादर्शनात् । ...इत्थं कमलकुन्दादितत्तत्कार्यसमाहाराभिधानादर्थात्सर्वर्तुसमाहारसिद्धिः । (म)

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचनान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ६८ ॥

CONSTRUE : यस्याम् (अलकायां) यक्षाः उत्तमस्त्रीसहायाः सितमणिमयानि ज्योतिश्छायाकुसुमरचनानि हर्म्यस्थलानि एत्य त्वद्गम्भीरध्वनिषु पुष्करेषु शनकैः आहतेषु कल्पवृक्षप्रसूतं रतिफलं मधु आसेवन्ते ।

(६८) तदेतेन दंपतीनां सदासुखितत्वमुक्तम् । (व)
त्वद्गम्भीरध्वनिषु अनेन मेघसंबन्ध उक्तः । (द)
पुष्करेषु...आहतेषु...एतच्च नृत्यगतियोरप्युपलक्षणम् । (म)

---

(68) Where the Yakṣas having gone to the terraces of [their] mansions paved with crystal, [and] having flower-arrangements [in the form] of the star-reflections, enjoy, with the most lovely (*uttama*) women as companions, the Ratiphala [leading on to enjoyment] wine coming forth from the wish-fulfilling tree, while drums producing deep noise like [that] of you, are being gently sounded.

---

१ कुसुमराचितान्यु... । २ मधुरं ।

[मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥ ६९ ॥]

CONSTRUE : यत्र (अलकायां) मन्दाकिन्याः सलिलशिशिरैः मरुद्भिः सेव्यमानाः, अनुतटरुहां मन्दाराणां छायया वारितोष्णाः अमरप्रार्थिताः कन्याः कनकसिकतामुष्टिनिक्षेपगूढैः अन्वेष्टव्यैः मणिभिः संक्रीडन्ते ।

(६९) गूढमणिसंज्ञया दैशिकक्रीडया सम्यक्क्रीडन्तीत्यर्थः ।...' रत्नादिभिर्वालुकादौ गुप्तैर्द्रष्टव्यकर्मभिः । कुमारीभिः कृता क्रीडा नाम्ना गूढमणिः स्मृता ॥ रासक्रीडा गूढमणिर्गुप्तकेलिस्तुलायनम् । पिच्छकन्दुकदण्डाद्यैः स्मृता दैशिककेलयः ' ॥ इति...(म)

नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपा
न्ह्रीमूढाणां भवति विफलप्रेरणा चूर्णमुष्टिः ॥ ७० ॥

CONSTRUE : यत्र (अलकायां) अनिभृतकरेषु प्रियेषु नीवीबन्धोच्छ्वसितशिथिलं क्षौमं रागात् आक्षिपत्सु ह्रीमूढानां बिम्बाधराणां चूर्णमुष्टिः अर्चिस्तुङ्गान् रत्नप्रदीपान् अभिमुखं प्राप्य अपि विफलप्रेरणा भवति ।

(७०) लज्जाव्याकुलत्वात्तासां चूर्णादिभिर्मणिदीपप्रशमनेच्छा । (व)
विद्युद्दीपानिति पाठः । त्वदीयविद्युत्तुल्यानित्यर्थः । अनेन मेघसंबन्ध उक्तः । (द)
अत्राङ्गनानां रत्नप्रदीपनिर्वापणप्रवृत्त्या मौग्ध्यं व्यज्यते । (म)

[(69) Where maidens longed for [even] by the gods, being waited upon by breezes cool with the waters of the Mandākinī [heavenly Ganges], with the heat warded off by the shade of the Mandāra [trees] growing along the banks, play with gems concealed, being deposited in the golden sands after being held in closed fists, [and] which are to be searched after.

(70) Where the handful of powder of [that is, hurled by] women possessed of Bimba-like lower lips and at a loss to know what to do through a sense of shame, while [their] lovers with bold [or, active] hands were snatching away, through passion, [their] silken garment loosened owing to the untying of the knot of the garment, has [its] throw rendered fruitless, although reaching the powerful jewel-lamps with prominent flames.

---

१ विद्युद्दीपानभि... ।

नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी-
रालेख्यानां स्वजलकणिकादोषमुत्पाद्य सद्यः ।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यन्त्रजालै-
र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ७१ ॥

CONSTRUE : नेत्रा सततगतिना यद्विमानाग्रभूमीः नीताः त्वादृशाः जलमुचः आलेख्यानां स्वजलकणिकादोषम् उत्पाद्य सद्यः शङ्कास्पृष्टाः इव धूमोद्गारानुकृतिनिपुणाः जर्जराः यन्त्रजालैः निष्पतन्ति ।

(७१) शङ्कास्पृष्टा...साशङ्कैर्हि सापराधत्वाद् व्याजेन पलाय्यते । (व)
अनेन मेघसंबन्धः स्पष्टः । (दृ)
यथा केनचिदन्तःपुरसंचारवता दूतेन गूढवृत्त्या रहस्यभूमिं प्रापितास्तत्र स्त्रीणां व्यभिचारदोषमुत्पाद्य सद्यः साशङ्काः क्लृप्तवेषान्तराः जाराः क्षुद्रमार्गैर्निष्क्रामन्ति तद्वदिति ध्वनिः । (म)

यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गिताना-
मङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधापगमविशदैरिन्दुपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥ ७२ ॥

CONSTRUE : यत्र (अलकायां) निशीथे त्वत्संरोधापगमविशदैः इन्दुपादैः तन्तुजालावलम्बाः स्फुटजललवस्यन्दिनः चन्द्रकान्ताः प्रियतमभुजोच्छ्वासितालिङ्गितानां स्त्रीणां सुरतजनिताम् अङ्गग्लानिं व्यालुम्पन्ति ।

(७२) तन्तुजालान अवलम्ब्यमानाः...प्रासादानामुपरितलेषु भेकादीनामवतरणनिषेधाय जालं वितन्वन्तीति प्रसिद्धम् । अत्र चन्द्रकान्तमणिबद्धरचनतन्तुजालं विवक्षितम् । त्वत्संरोधापगमविशदैः, अनेन मेघसंबन्ध उक्तः । (दृ)

---

(71) Clouds like you, led forth by the directing wind towards the top-terraces of the seven-storied mansions in which [Alakā], having caused damage straightaway with their water-drops to the paintings, as though filled [lit. touched] with apprehension, clever in imitating the smoke-escape, fall down through the gauze-windows, broken into pieces.

(72) Where, the moon-stones, hanging by the network of threads, shedding forth big drops of water owing to the moon's rays bright on account of the removal of your obstruction, completely destroy at midnight the body-langour caused by enjoyment of women whose embraces were released from the arms of [their dearest] lovers.

---

१ सलिलकणिका । नवजलकणैर्दोष...। २ यत्र जालै...निपुणं । जालमार्गै-। ३ भुजालिङ्गनोच्छ्वासिताना...।

[अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै-
रुद्गायद्भिर्धनपतियशः किंनरैर्यत्र सार्धम् ।
वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया
बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ॥ ७३ ॥]

CONSTRUE : यत्र (अलकायाम्) अक्षय्यान्तर्भवननिधयः विबुधवनितावार-मुख्यासहायाः बद्धालापाः कामिनः प्रत्यहं रक्तकण्ठैः धनपतियशः उद्गायद्भिः किंनरैः सार्धं वैभ्राजाख्यं बहिरुपवनं निर्विशन्ति ।

(७३) अक्षय्यान्त ...यथेच्छतंभोगसंभावनार्थमिदं विशेषणम् ।...उद्गायद्भिः... देवगानस्य गान्धारग्रामत्वात्तारतरं गायद्भिरित्यर्थः । ...विभ्राजस्येदं वैभ्राजम् । वैभ्रा-जमित्याख्या अस्य तद्वैभ्राजाख्यम् । ...चैत्ररथस्य नामान्तरमेतत् । (म)

[गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥ ७४ ॥]

CONSTRUE : यत्र (अलकायां) कामिनीनां नैशः मार्गः सवितुः उदये (सति) गत्युत्कम्पात् अलकपतितैः मन्दारपुष्पैः, पत्रच्छेदैः, कर्णविभ्रंशिभिः च कनककमलैः, मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैः हारैः च सूच्यते ।

(७४) मार्गपतितमन्दारकुसुमादिलिङ्गैरयमभिसारिकाणां पन्था इत्यनुमीयत इत्यर्थः । (म)

[(73) Where, day after day, lovers having inexhaustible treasures within [their] abodes, with celestial women, lovely harlots, as [their] companions, engaged in conversation, enjoy the outer garden known as Vaibhrāja, along with the sweet-voiced Kinnaras singing loudly the glory of the Lord of wealth.]

[(74) Where the path [traversed] at night, of love-wild ladies is indicated at the rise of the sun, by the Mandāra flowers fallen from the hair, by the bits of leaves and golden lotuses slipped away from the ears, and by necklaces with pearl strings, with [their] threads rent asunder on [their] expansive breasts, owing to [their] agitated gait [lit. the agitation of the gait.]

[आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै-
र्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात्।
नाप्यन्यत्र प्रणयकलहाद्विप्रयोगोपपत्ति-
र्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ॥ ७४ A ॥

CONSTRUE : यत्र (अलकायां) वित्तेशानां नयनसलिलम् आनन्दोत्थम् अन्यैः निमित्तैः न, इष्टसंयोगसाध्यात् कुसुमशरजात् अन्यः तापः न, प्रणयकलहात् अन्यत्र विप्रयोगोपपत्तिः अपि न, यौवनात् अन्यत् च वयः न खलु अस्ति।

यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः ॥ ७४ B ॥]

CONSTRUE : यत्र (अलकायां) पादपाः नित्यपुष्पाः (अतः एव) उन्मत्तभ्रमरमुखराः, नलिन्यः नित्यपद्माः (अतः एव) हंसश्रेणीरचितरशनाः, भवनशिखिनः नित्यभास्वत्कलापाः (अतः एव) केकोत्कण्ठाः, प्रदोषाः नित्य-ज्योत्स्नाः (अतः एव) प्रतिहततमोवृत्तिरम्याः।

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः[1] षट्पदज्यम्।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ ७५ ॥

[(74A) Where the tears [are] produced by joy, not by [any] other causes; no torment other than [that] arising from the flower-arrowed one [God of love] [and] to be liquidated by union with the beloved [person]; no occurrence of separation again elsewhere than in love-quarrel, and indeed no age other than youth exists [in the case] of the Yakṣas [the lords of wealth].

(74B) Where the trees with flowers on for ever [are] noisy with intoxicated bees; lotus-creepers with lotuses on for ever are encircled with [lit. have a girdle formed by] rows of swans; the domestic peacocks with [their] plumages ever shining have uplifted necks producing notes; [and] the evenings with constant moon-light [are] charming owing to the course of darkness being obstructed.]

(75) Where, knowing [Śiva] the friend of the Lord of wealth to be abiding in person, the God of love generally does not, through dread, wield [his] bow having bees for [its] string; his task is achieved by the graceful gestures themselves, of clever women, unfailing in regard to [their] mark, the lovers, with eyes directed along with the knittings of the eye-brows.

---

१ भयात् त्वामपि प्रेक्ष्य कामः।

CONSTRUE : यत्र (अलकायां) मन्मथः धनपतिसखं देवं साक्षात् वसन्तं मत्वा भयात् षट्पदज्यं चापं प्रायः न वहति; तस्य आरम्भः सभ्रूभङ्ग-प्रहितनयनैः कामिलक्ष्येषु अमोघैः चतुरवनिताविभ्रमैः एव सिद्धः ।

(७५) तदेतेन युवतिप्रावीण्यमुक्तम् । (व)

धनपतिसखमिति, अनेन वैश्रवणसख्यात् कैलासे नित्यं शिवो वसतीत्युक्तम् । ... त्वामपि प्रेक्ष्येत्यनेन मेघसंबन्ध उक्तः । मन्मथः षट्पदज्यामिति पाठे पूर्वश्लोकेष्विव मेघसंबन्धो न स्यात् । (द)

मन्मथचापोऽपि क्वचिदपि मोघः स्यादिति भावः । चतुराश्च ता वनिताश्च तासां विभ्रमैर्विलासैरेव सिद्धो निष्पन्नः । यदनर्थकरं पाक्षिकफलं च तत्प्रयोगाद्दूरं निश्चितसाधनप्रयोग इति भावः । (म)

[वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पम् ।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्या-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥ ७६ ॥]

CONSTRUE : यस्याम् (अलकायां) चित्रं वासः, नयनयोः विभ्रमादेशदक्षं मधु, किसलयैः सह पुष्पोद्भेदम्, भूषणानां विकल्पम्, चरणकमलन्यासयोग्यं लाक्षारागं च सकलम् अबलामण्डनम् एकः कल्पवृक्षः सूते ।

(७६) 'कचधार्यं देहधार्यं परिधेयं विलेपनम् । चतुर्धा भूषणं प्राहुः स्त्रीणामन्यच्च दैशिकम् ।' इति रत्नाकरे । तदेवैतदाह ...वासः ...वसनम् । परिधेयमण्डनमेतत् ।... नयनयो...अनेन विभ्रमद्वारा मधुनो मण्डनत्वमनुसंधेयम् । तच्च मण्डनाद्विवद् देहधार्येऽन्तर्भाव्यम् । ...पुष्पोद्भेदम् ...इदं तु कचधार्यम् । भूषणानां विकल्पा[1]न्विशेषान् । देहधार्यमेतत् । ...लाक्षारागम् इदं चाङ्गरागादिविलेपनमण्डनोपलक्षणम् । सकलं सर्वम् । चतुर्विधमपीत्यर्थः । (म)

[(76) In which [Alakā] the wish-fulfilling tree alone produces the complete decoration [out-fit] of women,—variegated garment, wine competent to instruct in graceful movements of the eyes, the blossoming of flowers along with sprouts, a variety of ornaments and lac-dye suitable for application to the lotus-like feet.]

---

१ विकल्पान् ।

[पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः
शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात् ।
योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ॥ ७६ A ॥]

CONSTRUE : यत्र (अलकायां) वाहाः पत्रश्यामाः दिनकरहयस्पर्धिनः, शैलोदग्राः करिणः त्वम् इव प्रभेदात् वृष्टिमन्तः, योधाग्रण्यः संयुगे प्रतिदशमुखं तस्थिवांसः चन्द्रहासव्रणाङ्कैः प्रत्यादिष्टाभरणरुचयः ।

तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं[1]
दूराल्लक्ष्यं त्वदमरधनुश्चारुणा तोरणेन[2] ।
यस्योद्याने[3] कृतकतनयो वर्धितः कान्तया मे
हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ॥ ७७ ॥

CONSTRUE : तत्र धनपतिगृहात् उत्तरेण त्वदमरधनुश्चारुणा तोरणेन दूरात् लक्ष्यम् अस्मदीयम् अगारं यस्य उद्याने मे कान्तया वर्धितः कृतकतनयः हस्तप्राप्यस्तबकनमितः बालमन्दारवृक्षः (अस्ति) ।

(७७) उत्तरेणेत्येनबन्तः । ...पञ्चम्यन्तः पाठस्त्वनार्यः । (व)

इतःपरं पञ्चसु श्लोकेषु यया कयाचन विधया मेघसंबन्धमुक्त्वा स्वगृहस्य लक्षणमाह । ...त्वदमरधनुश्चारुणा तोरणेनेति मेघसंबन्ध उक्तः । (द)

धनपतिगृहादितिपाठे 'उत्तरेण' इति नैनप्प्रत्ययान्तं किंतु 'तोरणेन' इत्यस्य विशेषणं तृतीयान्तम् । ...सुरपतिधनुश्चारुणा। ...अनेनाभिज्ञानेन दूरत एव ज्ञातुं शक्यमित्यर्थः । ...बालमन्दारवृक्षः कल्पवृक्षोऽस्तीति शेषः । (म)

[(76A) Where the horses dark-green like [tree] leaves [are capable of] vieing with the sun's horses [in speed] ; elephants lofty like hills [are] like you pouring forth showers, through the flowing of rut ; [and] the fore-most of warriors who had stood against Rāvana [the ten-mouthed one] in battle, surpassing [lit. repudiating] the splendour of ornaments by the scars of wounds [caused] by the Candrahāsa [Rāvaṇa's sword].]

(77) There [stands] our ancestral mansion, to the north of the palace [or buildings] of the Lord of wealth [that is, Kubera], [which] can be marked out from a distance by the archway as charming as the rainbow associated with you, in the garden of which [there is] a young Mandāra tree, reared up by my wife [as] an adopted son, bent down by clusters [of flowers] within reach of hand.

---

१ गृहानुत्तरेण । २ सुरपतिधनु... । यस्योपान्ते ।

वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा
हैमैस्स्फीता विकचकमलैर्दीर्घवैडूर्यनालैः।
यस्यास्तोये कृतवसतयो मानसं संनिकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्राप्य हंसाः ॥ ७८ ॥

CONSTRUE : अस्मिन् (अगारे) मरकतशिलाबद्धसोपानमार्गा दीर्घवैडूर्यनालैः हैमैः विकचकमलैः स्फीता वापी च (अस्ति), यस्याः (वाप्याः) तोये कृतवसतयः हंसाः त्वां प्राप्य अपि व्यपगतशुचः (सन्तः) संनिकृष्टं मानसं न आध्यास्यन्ति।

(७८) हेमशब्दो रजतादिः। (व)

यस्यां कृतवसतय इति वक्तव्ये तोयग्रहणं वर्षाकालेऽपि तोयस्य प्रसादातिशयसूचकम्। आध्यास्यन्तीति पाठः। ...त्वामपि प्रेक्ष्येत्यनेन मेघसंबन्ध उक्तः। (द)

तस्यास्तीरे विहितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः।
मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥ ७९ ॥

CONSTRUE : तस्याः (वाप्याः) तीरे पेशलैः इन्द्रनीलैः विहितशिखरः कनककदलीवेष्टनप्रेक्षणीयः क्रीडाशैलः (अस्ति), (हे) सखे, उपान्तस्फुरिततडितं त्वां प्रेक्ष्य मद्गेहिन्याः प्रिय इति कातरेण चेतसा तम् एव स्मरामि।

(७९) सादृश्यात्प्रियत्वाच्च स्मरणम्। कातरत्वं तु विरहवशात्। (व)

अत्र मेघसंबन्धः स्पष्टः। (द)

उपान्तेषु प्रान्तेषु स्फुरितास्तडितो यस्य...इदं विशेषणं कदलीसाम्यार्थमुक्तम्। इन्द्रनीलसाम्यं तु मेघस्य स्वाभाविकमित्यनेन सूच्यते। ...कातरेण भीतेन ...भयं चात्र सानन्दमेव। ...स्मरामि ...स्मरणाख्योऽलंकारः। (म)

---

(78) In it [there is] again a tank [or well], the flight of steps to which is built of emerald slabs, [which is] thronged with full-blown golden lotuses having long stalks of Vaidūrya [gems], the swans having taken up [their] abode in the waters of which, freed from distress, do not long for the Mānasa [lake] near at hand, even on securing you [that is, at your approach].

(79) On its bank [there is] a pleasure-hill with [its] peak made up of fine Indranilas [sapphires], charming to look at owing to an enclosure of golden plantain trees ; on seeing you, with lightning distinctly flashing near about, I remember, [O] friend, that self-same [hill] with a trembling heart, as [it was] a favourite of my wife.

---

१ हैमैः स्यूता कमलमुकुलैः स्निग्धवैदूर्य...। २ प्रेक्ष्य। ३ निचिताशिखरः।

रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरबकवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दौहृदच्छद्मनास्याः ॥ ८० ॥

CONSTRUE : अत्र कुरबकवृतेः माधवमिण्डपस्य प्रत्यासन्नौ चलकिसलयः रक्ताशोकः कान्तः केसरः च (स्तः); एकः (अशोकः) मया सह तव सख्याः (दौहृदच्छद्मना) वामपादाभिलाषी, अन्यः दौहृदछद्मना अस्याः वदनमदिरां काङ्क्षति ।

(८०) मया सह । अहमपि सापराधस्तदीय पादप्रहारमभिलषामीत्यर्थः ।... अहमपि तदीयां वदनमदिरां काङ्क्षामीत्यर्थः । (व)

तव सख्या इति मेघसंबन्ध उक्तः । (द)

अशोकबकुलयोः स्त्रीपादताडनं गण्डूमदिरा च दोहद इति प्रसिद्धिः । 'स्त्रीणां स्पर्शात्प्रियङ्गुर्विकसति बकुलः शीधुगण्डूषसेकात्पादाघातादशोकस्तिलककुरबकौ वीक्षणालिङ्गनाभ्याम् ॥ मन्दारो नर्मवाक्यात्पटुमृदुहसनाच्चम्पको वक्त्रवाताच्चूतो गीतान्नमेरुर्विकसति च पुरो नर्तनात्कर्णिकारः ॥' (म)

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।
तालैः शिञ्जावलयसुभगैः कान्तया नर्तितो मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥ ८१ ॥

CONSTRUE : तन्मध्ये च अनतिप्रौढवंशप्रकाशैः मणिभिः मूले बद्धा स्फटिकफलका काञ्चनी वासयष्टिः (अस्ति), शिञ्जावलयसुभगैः तालैः मे कान्तया नर्तितः वः सुहृत् नीलकण्ठः दिवसविगमे याम् अध्यास्ते ।

(८१) शिञ्जावन्ति वलयानि शिञ्जावलयानि । शाखावृक्षवत्समासः । शिञ्जद्वलयसुभगैरिति पाठे 'शिञ्जि अव्यक्ते शब्दे' इत्ययं धातुरात्मनेपदी । तस्मात्परस्मैपदं न भवति । नीलकण्ठः सुहृद् वः इति मेघसंबन्ध उक्तः । (द)

'तत्रागारम्' इत्यारभ्य पञ्चसु श्लोकेषु समृद्धवस्तुवर्णनादुदात्तालंकारः । (म)

---

(80) Here [is] the red Aśoka with [its] shoots waving about, and the lovely Kesara [Bakula] standing close by the bower of Mādhavī [creepers], with the hedge of Kurabaka [plants]; one [of them, that is, the Aśoka] along with me [is] desirous of [being kicked by] the left foot of your friend, [while] the other [along with me] has a desire for the wine in [her] mouth, under the pretext of [that being its] longing at budding time [the fulfilment of which would cause it to blossom].

(81) Between them [or inside the house] [is] a golden perch having a crystal slab, set at the bottom with gems shining like not very old bamboos, on which at the close of day, roosts your dear friend, the peacock, [who is] made to dance by my wife with the clappings of the hands, [rendered] charming by [her] jingling bracelets.

---

१ दोहद... । दोहल... । २ शिञ्जद्वलय...

एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथा
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा ।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥ ८२ ॥

CONSTRUE : (हे) साधो, हृदयानिहितैः एभिः लक्षणैः द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ दृष्ट्वा च अधुना मद्वियोगेन नूनं क्षामच्छायं भवनं लक्षयेथाः, (तथाहि) सूर्यापाये कमलं स्वाम् अभिख्यां न पुष्यति खलु ।

(८२) शङ्खपद्मौ शङ्खपद्माख्यौ निधिविशेषौ...इदानीनात्मीयं तद्भवनं संस्मृत्य विषण्ण आह क्षामच्छायमिति । (दृ)

द्वारोपान्ते । एकवचनमविवक्षितम् ।...न पुष्यति...सूर्यविरहितं पद्ममिव पतिविरहितं गृहं न शोभते इत्यर्थः । (म)

गत्वा सद्यः कलभतनुतां शीघ्रसंपातहेतोः
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः ।
अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ ८३ ॥

CONSTRUE : (हे मेघ), शीघ्रसंपातहेतोः सद्यः कलभतनुतां गत्वा प्रथमकथिते रम्यसानौ क्रीडाशैले निषण्णः (सन्) अल्पाल्पभासं खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् अन्तर्भवनपतितां कर्तुम् अर्हसि ।

(८३) कलभतनुतां...महति हि देहे व्यथा जायते । (व)

रत्नसानौ, इदं विशेषणं सौदामनीदर्शनेऽपि रत्नप्रभेति तस्या बुद्धिजननाय कृतम् । (दृ)

विद्युदुन्मेषः...एव दृष्टिस्तां...कर्तुमर्हसि । यथा कश्चित् किंचिद्न्विष्यन्क्वचिदुन्नते स्थित्वा शनैः शनैरतितरां द्राघीयसीं दृष्टिमिष्टदेशे पातयति तद्वदित्यर्थः । (म)

---

(82) By means of these characteristics treasured up in the mind and on seeing Sankha [conch] and Padma [lotus] figures drawn on the [two] sides of the door, you would, [O] good one, recognise [my] house with [its] lustre undoubtedly diminished now owing to my separation; surely, on the passing away of the sun, does the [day-] lotus not augment [or retain] its own beauty.

(83) Assuming forthwith the form of the young one of an elephant for the purpose of quick descending, seated [or resting] on the aforesaid pleasure-hill with a lovely peak, you should [lit. deserve to] let fall inside the house [your] glance [in the form] of the lightning flash, of a very slight brilliancy [and] resembling the gleaming of a line of fire-flies.

---

१ ...र्लक्षणीयं । २ रत्नसानौ ।

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ॥ ८४ ॥

CONSTRUE : तन्वी, श्यामा, शिखरिदशना, पक्वबिम्बाधरोष्ठी, मध्ये क्षामा, चकितहरिणीप्रेक्षणा, निम्ननाभिः, श्रोणीभारात् अलसगमना, स्तनाभ्यां स्तोकनम्रा, युवतिविषये धातुः आद्या सृष्टिः इव या तत्र स्यात् (तां जानीयाः in the next verse)।

(८४) श्यामा श्यामवर्णा हरितवर्णेत्यर्थः ! ... यद्वा 'श्यामा यौवनमध्यस्था प्रौढा निष्क्रान्तयौवना ' इत्युत्पलमालायाम् । ... शिखरिदशनेति पाठः । ... तथा सामुद्रे , स्निग्धाः समानरूपाः सुपङ्क्तयः शिखरिणः श्लिष्टाः । दन्ता भवन्ति यासामासां पादे जगत् सर्वम् ॥ ' ...स्याद् आख्यातप्रतिरूपमव्ययमिदं यदर्थे वर्तते । (द)

चकितहरिण्याः...एतेनास्याः पद्मिनीत्वं व्यज्यते । ...निम्ननाभिर्गम्भीरनाभिः। अनेन नारीणां नाभिगाम्भीर्यान्मदनातिरेक इति कामसूत्रार्थः सूच्यते।... आद्या सृष्टिः प्रथमशिल्पमिव स्थितेत्युत्प्रेक्षा । प्रथमनिर्मिता युवतिरियमेवेत्यर्थः । प्रायेण शिल्पिनां प्रथमनिर्माणे प्रयत्नातिशयवशाच्छिल्पनिर्माणसौष्ठवं दृश्यत इत्याद्यविशेषणम् । तथा चास्मिन्प्रपञ्चे न कुत्राप्येवंविधरामणीयकं रमणीयरत्नमस्तीति भावः । (म)

तां जानीयाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठा गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥ ८५ ॥

---

(84) Slender, youthful (*śyāmā*, or of a fair complexion), possessed of pointed teeth, with the lower lip [red] like ripe Bimba [fruit], of a thin waist, with eyes like those of a frightened deer, possessed of a deep navel, of a slow gait owing to the weight of the hips, slightly stooping [or bent down] on account of the [two] breasts, she,—who may be there— the very first [that is, executed with great care] creation as it were of the Creator, in the matter of young ladies.

(85) You should know her of few words, [to be] my second life, like the lonely female Cakravāka, I, [her] mate, being far away; when these heavy [or long] days are passing, I think that the young lady, extremely love-sick, has become [all] changed in form [or appearance] like a lotus-creeper blighted by frost.

---

१ ...वतिविषया । २ बालां जातां...मथितां पद्मिनीं वान्यरूपाम् ।

CONSTRUE: सहचरे मयि दूरीभूते (सहचरे दूरीभूते) एकां चक्रवाकीम् इव परिमितकथां तां मे द्वितीयं जीवितं जानीयाः; गुरुषु एषु दिवसेषु गच्छत्सु गाढोत्कण्ठा बाला शिशिरमथिता पद्मिनी इव अन्यरूपा जाता (इति) मन्ये।

(८५) वाशब्दः इवार्थे। (व)

सहचरे चक्रवाकीमिवैका...अस्यार्थस्य मूलं 'सहचररहितेव चक्रवाकी जनकसुता कृपणां दशां प्रपन्ना।' इति श्रीरामायणवचनम्।...शिशिरमथिता...अस्यार्थस्य मूलं 'हिमहतनलिनीव नष्टशोभा' इति वचनम्। अनेन श्रीरामायणवचनार्थानुसारेण कवेः पूर्वोक्तो रामकथाभिलाषः स्पष्टः। (द)

द्वितीयं जीवितं...जीविततुल्यां मत्प्रेयसीमगवच्छेरित्यर्थः।...अन्यरूपां पूर्वविपरीताकारां जातां मन्ये...एतावता नेयमन्येति भ्रमितव्यमिति भावः। (म)

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं बहूनां
निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम्।
हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं त्वदुपसरणक्लिष्टकान्तेर्बिभर्ति ॥ ८६ ॥

CONSTRUE: प्रबलरुदितोच्छूननेत्रं, बहूनां निःश्वासानाम् अशिशिरतया भिन्नवर्णाधरोष्ठं, हस्तन्यस्तं, लम्बालकत्वात् असकलव्यक्ति तस्याः मुखं त्वदुपसरणक्लिष्टकान्तेः इन्दोः दैन्यं नूनं बिभर्ति।

(८६) त्वदुपगमनक्लिष्टकान्तोरिति मेघसंबन्धः। मेघसंवृतत्वमलक्कलम्बनस्थानीयम्। (द)

पूर्ववत्तथा न भ्रमितव्यमिति भावः। (म)

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती।
पृच्छन्ती वा मधुरवचनं सारिकां पञ्जरस्थां
कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥ ८७ ॥

---

(86) I think (*nūnam*, or possibly) that her face resting on [her] hand, with eyes swollen owing to bitter weeping, with the lower lip changed in colour on account of the not cool nature of numerous sighs, not fully visible owing to her tresses hanging about [loosely], wears the plight of the moon whose lustre has been impaired by your pursuit.

(87) She will fall within your sight [that is, would be seen by you], either busy with the worship [of the deities] or drawing a likeness of me emaciated by separation pictured in the mind [or conceived by fancy], or asking in a sweet voice the Sārikā [female parrot] kept in the cage "Do you [or, I hope you] remember with regret, [O] appreciative one, [your] master? For, you [were] his pet;"

---

१ प्रियाया। २ त्वदुपगमनाक्लिष्ट। ३ मधुरवचनां। ४ निभृते। गिरिके।

CONSTRUE : सा बलिव्याकुला वा, विरहतनु भावगम्यं मत्सादृश्यं लिखन्ती वा, पञ्जरस्थां सारिकां (हे) रसिके, भर्तुः स्मरसि कच्चित्, त्वं हि तस्य प्रिया इति मधुरवचनं पृच्छन्ती वा ते आलोके पुरा निपतति ।

(८७) हे निभृते, विनीते ।...पुरा निपततीति यावत्पुरानिपातयोर्लट् । (व,)

आलोके दर्शने...पुरा, भविष्यत्कालद्योतकमव्ययमिदम् । पुरा निपततीति निपतिष्यतीत्यर्थः । त्वां दृष्ट्वा सा भृशं मद्विरहाद् भूमौ निपतिष्यतीति यावत् ।... अथवा त्वद्दर्शनात् पुरा वक्ष्यमाणान् कुर्वती सा तवालोके भूमौ निपततीत्यर्थः । बलिव्याकुला, अत्र प्रियतमागमनार्थं देवताभ्यो बलिप्रदानं विवक्षितम् ।...मत्सादृश्यं मत्प्रतिकृतिं मद्विषयमालेख्यम् ।...विरहतनु...इदं विशेषणं सादृश्यशब्दस्यालेख्यवाचित्वे घटते । भावगम्यं, विरहात् प्राक् तादृशस्य संप्रत्येवमन्यथाभावः संभवतीत्युत्प्रेक्षागम्यमित्यर्थः । शारिकां-शारिकेति व्यक्तवाक् कापि चटकविशेषस्त्री ।...गिरिके, मार्जारादिसंनिधानात् पञ्जराभ्यन्तरं प्रविश्य बालमूषिकेव बिभेतीति बालमूषिकानामान्तरेण शारिकाया उपालम्भपूर्वं संबोधनम् । 'गिरिका बालमूषिका' इत्यमरः । (दृ)

...लिखन्ती...चित्रदर्शनस्य विरहिणीविनोदोपायत्वादिति भावः । (म)

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।
तन्त्रीरार्द्रा[1] नयनसलिलैः सारयित्वा कथंचि-
द्भूयो भूयः स्वयमधिकृतां[2] मूर्च्छनां विस्मरन्ती ॥ ८८ ॥

CONSTRUE : (हे) सौम्य, मलिनवसने उत्सङ्गे वीणां निक्षिप्य मद्गोत्राङ्कं विरचितपदं गेयम् उद्गातुकामा नयनसलिलैः आर्द्राः तन्त्रीः कथंचित् सारयित्वा भूयः भूयः स्वयम् अधिकृतां मूर्च्छनां विस्मरन्ती वा (सा ते आलोके पुरा निपतति)।

(८८) मूर्च्छनां सप्तस्वरक्रमस्थापनाम् । 'क्रमयुक्ताः स्वराः सप्त मूर्च्छना परिकीर्तिता' इति भरते । (दृ)

मलिनवसने 'प्रोषिते मलिना कृशा' इतिशास्त्रादित्यर्थः । उद्गातुं...देवयोनित्वाद्गान्धारग्रामेण गातुकामेत्यर्थः । तदुक्तम्—'षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः । न तु गान्धारनामानं स लभ्यो देवयोनिभिः ॥'...सारयित्वा । आर्द्रत्वापहरणाय करेण प्रमृज्यान्यथा क्वणनासंभवादिति भावः । ...स्वयमात्मना कृतामपि । विस्मरणानर्हामपीत्यर्थः । ...विस्मरन्ती...विस्मरणं चात्र दयितगुणस्मृतिजनितमूर्च्छावशादेव । (म)

---

(88) or, having placed the lute, [O] gentle one, on [her] lap [clad] with a non-gaudy garment, desirous of singing loudly a song the words in which are so arranged as to have my name as [their] distinguishing feature, [and] touching [or wiping off] somehow the strings wet with tears from the eyes, [and] forgetting again and again the melody planned by herself;

---

१ तन्त्रीमार्द्रां । २ स्वयमपि कृतां ।

शेषान्मासान्विरहदिवसस्थापितस्यावधेर्वा[1]
विन्यस्यन्ती भुवि गणनया देहलीमुक्तपुष्पैः[2] ।
संयोगं वा हृदयरचितारम्भमास्वादयन्ती[3]
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥ ८९ ॥

CONSTRUE : विरहदिवसस्थापितस्य अवधेः शेषान् मासान् देहलीमुक्त-पुष्पैः गणनया भुवि विन्यस्यन्ती वा, हृदयरचितारम्भं संयोगम् आस्वादयन्ती वा (ते आलोके पुरा निपतति); प्रायेण अङ्गनानां रमणविरहेषु एते विनोदाः ।

(८९)...देहली, तत्रैव तस्याः प्रियतमालोकनोत्सुकतयावस्थानात् । (द)

...गणनया...विन्यस्यन्ती...पुष्पविन्यासैर्मासान् गणयन्ती वेत्यर्थः ।...प्रायेण... एतेन संकल्पावस्थोक्ता । (म)

सव्यापारामहनि न तथा पीडयेद्विप्रयोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।
मत्संदेशैः सुखयितुमतः[4] पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां[5] सद्मवातायनस्थः[6] ॥ ९० ॥

CONSTRUE : अहनि सव्यापारां (ते सखीं) विप्रयोगः तथा न पीडयेत् रात्रौ निर्विनोदां ते सखीं गुरुतरशुचं शङ्के; अतः निशीथे उन्निद्राम् अवनिशयनां साध्वीं तां मत्संदेशैः सुखयितुं सद्मवातायनस्थः (सन्) पश्य ।

(९०) साध्वीं पतिव्रताम् । ...अतो नान्यथा शङ्कितव्यमिति भावः । ...अनेन जागरावस्थोक्ता । (म)

---

(89) or depositing [one by one] on the ground the flowers placed at the threshold, for counting the remaining months of the period starting from the day of separation, or tasting [the pleasures of] union [with me], the working of which is pictured in the mind—these [are [mostly the pastimes of ladies during [the periods of] separation from [their] lovers.

(90) Separation would not afflict [her] so much by day, engaged [as she would be] in work ; I am afraid that at night your friend without any diversion, [would be] afflicted far too heavily ; so, in order to cheer [her] up by my messages, see, standing at the window of the house, that chaste one sleepless and lying down on the ground, at midnight.

---

१ गमनादिवसप्रस्तुतस्यावधे- । २ दत्त... । ३ मत्संभोगं हृदयनिहितारम्भमास्वाद ... । ४ मलं । ५ ...द्रां विरहशयनां । ६ शयनासन्नवातायनस्थः ।

आधिक्षामां विरहशयने संनिषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः ।
नीता रात्रिः क्षणमिव मया सार्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् ॥ ९१ ॥

CONSTRUE : आधिक्षामां विरहशयने संनिषण्णैकपार्श्वां प्राचीमूले कलामात्रशेषां हिमांशोः तनुम् इव (स्थिताम्), या रात्रिः मया सार्धम् इच्छारतैः क्षणम् इव नीता ताम् एव विरहमहतीम् उष्णैः अश्रुभिः यापयन्तीम् (तां पश्य)।

(९१) या यज्जातीया तामेव तज्जातीयामेव । (व)

प्राच्या...मूले...प्राचीग्रहणं क्षीणावस्थाद्योतनार्थम् । ...मया सार्धमिच्छया कृतानि रतानि तैः । शाकपार्थिवादित्वान्मध्यमपदलोपी समासः । ...स एव कालः सुखिनामल्पः प्रतीयते । दुःखिनां तु विपरीत इति भावः। एतेन कार्श्यावस्थोक्ता। (म)

निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात्परुषमलकं नूनमागण्डलम्बम् ।
मत्संयोगः कथमुपनमेत्स्वप्नजोऽपीति निद्रा-
माकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ॥ ९२ ॥

CONSTRUE : शुद्धस्नानात् परुषं नूनम् आगण्डलम्बम् अलकम् अधरकिसलयक्लेशिना निःश्वासेन विक्षिपन्तीम्, स्वप्नजः अपि मत्संयोगः कथमुपनमेत् इति नयनसलिलोत्पीडरुद्धावकाशां निद्राम् आकाङ्क्षन्तीम् (तां पश्य)।

(९२) अत्राश्रुविसर्जनेन लज्जात्यागो व्यज्यते । (म)

---

(91) emaciated by mental agony, resting on one side of [her] bed of separation [that is, lonely and undecorated] like the disc of the moon [lit. cool-rayed one], with only one digit remaining on the Eastern horizon, [and] passing, with [that is, shedding] hot tears, that same night [now rendered] long owing to separation [from me], which was [formerly] passed like a moment, along with me in enjoyments at will;

(92) throwing aside with a sigh afflicting [that is, impairing the beauty of her] sprout-like lower lip, [her] tresses rough [or coarse] owing to [her taking] simple baths [that is, without the application of oil etc.] [and] hanging in all probability about her cheeks, thinking (*iti*) how union with me produced even in a dream could be forthcoming, [and hence] longing for sleep the scope for which is stemmed by the gush of tears [lit. water] from the eyes;

---

१ संनिकीर्णैकपार्श्वां । २ मत्संभोगः ।

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्तीं
गण्डाभोगात्कठिनविषमामेकवेणीं करेण ॥ ९३ ॥

CONSTRUE : आद्ये विरहदिवसे दाम हित्वा या शिखा बद्धा शापस्य अन्ते विगलितशुचा मया उद्वेष्टनीयां स्पर्शक्लिष्टां कठिनविषमाम् एकवेणीम् ताम् अयमित-नखेन करेण गण्डाभोगात् असकृत् सारयन्तीम् (तां पश्य) ।

(९३) शिरोदाम हित्वेति पाठः । शिखादाम हित्वेति पाठे शिखाशब्दः शिरःशब्द-पर्यायो न भवति । ...एकवेणीम् एकबन्धनवती वेणी एकवेणी । (द)

असकृत् सारणाच्चित्तविभ्रमदशा सूचिता । (म)

पादानिन्दोरमृतशिशिराञ्जालमार्गप्रविष्टा-
न्पूर्वप्रीत्या गतमभिमुखं संनिवृत्तं तथैव ।
खेदाच्चक्षुः सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं नप्रबुद्धां नसुप्ताम् ॥ ९४ ॥

CONSTRUE : जालमार्गप्रविष्टान् अमृतशिशिरान् इन्दोः पादान् पूर्वप्रीत्या अभिमुखं गतं तथा एव संनिवृत्तं चक्षुः खेदात् सलिलगुरुभिः पक्ष्मभिः छादयन्तीं साभ्रे अह्नि नप्रबुद्धां नसुप्तां स्थलकमलिनीम् इव (स्थितां तां पश्य) ।

(१४) नेत्रनिमीलनात्प्रबोधाभावो निद्राभावश्च स्वापशून्यतया । अतश्च साभ्रेऽह्नि स्थलकमलिनीमिवेत्युपमा । सा हि साभ्रत्वान्न प्रबुद्धा दिनवशाच्च न सुप्ता । (व)

स्थलकमलिनी सूर्यकिरणस्पृष्टा विकसति मेघच्छन्नैः किरणैरस्पृष्टा निमीलति च । (द)

नप्रबुद्धाम्...न सुप्ताम्...उभयत्रापि नञर्थस्य नशब्दस्य सुप्सुपेति समासः ।... एतेन विषयद्वेषाख्या षष्ठी दशा सूचिता । (म)

---

(93) pushing aside repeatedly by [her] hand with the nails unpared, that single braid of hair, from the region of the cheeks, painful to the touch, rough and irregular, which braid was tied up without the garland, on the first day of separation [and] which has to be loosened by me relieved from grief at the end of the [period of the] curse;

(94) covering with the eyelashes heavy with water [tears], through dejection, the eye which out of previous [experience of] delight [secured at their sight], turned towards the moon's rays cool like nectar, entering through the window-way, and turned back strightaway, [and so appearing] like a lotus-creeper on land, neither blossomed [lit. awakened], nor [yet] with the petals closed [lit. asleep] on a cloudy day.

---

१ शिरोदाम । २ गतमपि ततः । ३ चक्षुः खेदात्सजलगुरुभिः ।

सा संन्यस्ताभरणमबला पेलवं धारयन्ती
शय्योत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम्।
त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥ ९५॥

CONSTRUE : अवला संन्यस्ताभरणम् असकृत दुःखदुःखेन शय्योत्सङ्गे निहितं पेलवं गात्रं धारयन्ती सा त्वाम् अपि नवजलमयम् अस्रम् अवश्यं मोचयिष्यति; प्रायः आर्द्रान्तरात्मा सर्वः करुणावृत्तिः भवति।

(९५) आर्द्रान्तरात्मा, मेघस्य जलार्द्रान्तरात्मत्वं विवक्षितम्। (द्र)
अस्मिन्नवसरे सर्वथा त्वया शीघ्रं गन्तव्यमनन्तरदशापरिहारायेति संदर्भाभिप्रायः। (म)

जाने सख्यास्तव मयि मनः संभृतस्नेहमस्मा-
दित्थंभूतां प्रथमविरहे तामहं तर्कयामि।
वाचालं मां न खलु सुभगंमन्यभावः करोति
प्रत्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया यत् ॥ ९६॥

CONSTRUE : तव सख्याः मनः मयि संभृतस्नेहं जाने, अस्मात् (कारणात्) प्रथमविरहे अहं ताम् इत्थंभूतां तर्कयामि, सुभगंमन्यभावः मां वाचालं न करोति खलु; (हे) भ्रातः, मया यत् उक्तं (तत्) निखिलम् अचिरात् ते प्रत्यक्षं (भविष्यति)।

(९६) नन्वीदृशीं दशामापन्नेति कथं त्वया निश्चितमत आह। ...प्रथमविरहे। प्रथमग्रहणं दुःखातिशयद्योतनार्थम्। ... सुभगमानित्वं मां वाचालं बहुभाषिणं न करोति खलु। सौन्दर्याभिमानान्न प्रलपामीत्यर्थः। (म)

---

(95) That weak woman bearing a delicate body with ornaments cast away, [and] placed repeatedly with intense distress on the region of the bed, would assuredly cause even you to shed a tear in the form of fresh [shower of] water; every one with a tender [wet] inner heart [inside], is as a rule of a compassionate nature.

(96) I know [that] the heart of your friend [is] saturated with affection for me; therefore I conjecture her to have become like this on [this] first separation. [It is] surely not a boastful opinion about my personal attractions [that] makes me garrulous; all that has been spoken by me, [O] brother, [would be] ere long obvious to [or, directly known by] you.

---

१ पेशलं। २ सकलम...।

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥ ९७ ॥

CONSTRUE : अलकैः रुद्धापाङ्गप्रसरम् अञ्जनस्नेहशून्यम् अपि च मधुनः प्रत्यादेशात् विस्मृतभ्रूविलासं त्वयि आसन्ने उपरिस्पन्दि मृगाक्ष्याः नयनं मीनक्षोभात् चलकुवलयश्रीतुलाम् एष्यति इति शङ्के ।

(९७) शोकाच्चाञ्जनस्नेहेन रहितम् । तथा मद्यस्य वर्जनाद्विस्खलितभ्रूविलासम् । (व)

विस्मृतभ्रूविलास ...ननु विलासिनीनां स्वभावत एव भ्रूविलासः संभवति ।... कथमत्र मधुपानायत्तो भ्रूविलास इत्युक्तम् । सत्यम् । अत्र स्वभावसिद्धोऽपि भ्रूविलासः स्वोद्दीपनविभावस्य मधुपानस्याभावान्नाभिव्यज्यत इति कवेरभिप्रायः । ...त्वद्दर्शनेन तस्याः कुशलसूचकं वामाक्षिस्पन्दनरूपं निमित्तं भविष्यतीत्याह त्वय्यासन्ने ... । (द)

नयनस्य रुद्धापाङ्गप्रसरत्वादिकं विरहसमुत्पन्नमिति भावः । त्वय्यासन्ने सति । स्वकुशलवार्ताशंसिनीति शेषः । नयनम् । वाममिति शेषः । 'वामभागस्तु नारीणां पुंसां श्रेष्ठस्तु दक्षिणः । दाने देवादिपूजायां स्पन्देऽलंकरणेऽपि च ॥' इति स्त्रीणां वामभागप्राशस्त्यात् । (म)

वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-
र्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।
संभोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः सरसकदलीगर्भगौरश्चलत्वम् ॥ ९८ ॥

---

(97) I suspect that the eye of the deer-eyed one, the movement towards the outer corners of which is prevented by the tresses, [which is] devoid of the glossy appearance due to collyrium and which has also forgotten the graceful knitting of the eye-brows owing to [her] abstinence from wine, throbbing in the upper part when you would be near, would bear comparison to the beauty of a blue lotus waving on account of the agitation [caused by the movements] of the fish.

(98) And her left [or, beautiful] thigh, being made void of my nail-marks, and made to give up, through course of fate, the pearl-string familiar for long, quite used to gentle shampooings by my hands at the conclusion of enjoyment, [and] yellowish-white like the juicy interior [or stem] of a plantain tree, would set throbbing.

---

१ वामं मृगाक्ष्या मन्ये मीनाच्चल... । २ चिरविरचितं । ३ कनककदलीस्तम्भगौर... ।

CONSTRUE : मदीयैः कररुहपदैः मुच्यमानः, चिरपरिचितं मुक्ताजालं दैवगत्या त्याजितः, संभोगान्ते मम हस्तसंवाहनानां समुचितः सरसकदलीगर्भगौरः अस्याः वामः ऊरुः च चलत्वं यास्यति ।

(९८) स्त्रीणां मुक्तामयं कटीभूषणं मुक्ताजालमित्युच्यते । ...इदमत्रानुसंधेयम्-ऊरुमूले निहितानां नखक्षतानां निर्वापणाय स्त्रियः खलु प्रियतमैः सार्धं स्वयं विरचितानि मुक्ताजालकानि बिभ्रति। सा पुनरिदानीं नखक्षताभावाद् नखक्षतनिर्वापणं मुक्ताजालकं दैवगत्या न बिभर्तीति खेदवचनमिति। (द)

...त्याजितः । संप्रति नखपदोष्माभावेन शीतोपचारस्य वैयर्थ्यादिति भावः। (म)

तस्मिन्काले जलद यदि सा लब्धनिद्रासुखा स्या-
दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।
मा भूदस्याः प्रणयिनि ज[1]ने स्वप्नलब्धे कथंचि-
त्सद्यःकण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥ ९९ ॥

CONSTRUE : (हे) जलद, तस्मिन् काले यदि सा लब्धनिद्रासुखा स्यात् एनाम् अन्वास्य स्तनितविमुखः (सन्) याममात्रं सहस्व; अस्याः प्रणयिनि जने (मयि) कथंचित् स्वप्नलब्धे गाढोपगूढं सद्यःकण्ठच्युतभुजलताग्रन्थि मा भूत् ।

(९९) याममात्रं सहस्वेति। ननु विरहिणां याममात्रं स्वापो न भवति। ...सत्यमिदम् । न तत्स्वापापेक्षया याममात्रपदं प्रयुक्तं किन्तु संभोगापेक्षया । संभोगस्य परमावधिरेकवारो यामावसायिक इति कामतन्त्रविदो वदन्ति । (द)

स्तनितविमुखो ... अन्यथा निद्राभङ्गः स्यादिति भावः । ...न चात्र निद्रोक्तिः 'तामुन्निद्राम्' इति पूर्वोक्तेन निद्राच्छेदेन विरुध्यते । पुनः सप्तम्याद्यवस्थासु पाक्षिकनिद्रासंभवात् । (म)

प्रो[2]त्थाप्यैनां स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।
विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे
व[3]क्तुं धीर स्तनितवचनो मानिनीं प्रक्रमेथाः ॥ १०० ॥

---

(99) If at that time, O cloud, she would have secured the pleasure of sleep, waiting upon her, averse to thundering, bear up just for a period of three hours; let there be no close embrace of her, with [me] the loving one secured in a dream with great difficulty, have the tie of creeper-like arms slipping off straightaway from the neck.

(100) Having awakened her with a breeze cool with spray of your water, you with lightning [suppressed or concealed] within, should proceed to talk, O firm one, in words [in the form] of thunder, to the spirited lady refreshed along with the very fresh Mālatī buds, [and] with eyes fixed on the window occupied by you.

---

१ मयि । २ तामुत्थाप्य । ३ वक्तुं धीरैः स्तनितवचनैर्मा- ।

CONSTRUE : एनां स्वजलकणिकाशीतलेन अनिलेन प्रोत्थाप्य अभिनवैः मालतीनां जालकैः समं प्रत्याश्वस्ताम् त्वत्सनाथे गवाक्षे स्तिमितनयनां मानिनीं (हे) धीर, विद्युद्गर्भः स्तनितवचनः (सन्) वक्तुं प्रक्रमेथाः ।

(१००) ...शीतलेनानिलेन...अनेन जातीकुसुमेभ्योऽप्यधिकं तस्याः सौकुमार्यमस्तीति सूचितम् । मालत्यः खलु वर्षासु पुष्यन्ति रात्रौ च विकसन्ति । ...त्वत्सनाथे ...भर्तृसकाशादेवं कोऽप्यागच्छेद् इत्युत्कण्ठया सर्वदा वातायनदत्तदृष्टिमित्यभिप्रायः । ...मानिनीं...अनेन विशेषणेन तस्याः पुरस्ताद् धीरमेव वक्तव्यं कातरवचने तु सा मिथ्येति जानातीत्युक्तम् । (द्व)

शीतलेनानिलेन...एतेन तस्याः प्रभुत्वाद्व्यजनानिलसमाधिर्व्यज्यते । ...मानिनीं मनस्विनीम् । अनौचित्यासहिष्णुमित्यर्थः । ...विद्युद्गर्भे ...दृष्टिप्रतिघातेन वक्तुर्मुखावलोकनप्रतिबन्धकत्वान्न द्योतितव्यमिति भावः । धीरो दृढः सन् । अन्यथाशीलत्वाद्वैतद्नाश्वासनप्रसङ्गादिति भावः । (म)

भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्संदेशैर्मनसि निहितैरागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥ १०१ ॥

CONSTRUE : (हे) अविधवे, मां भर्तुः प्रियं मित्रं मनसि निहितैः तत्संदेशैः त्वत्समीपम् आगतम् अम्बुवाहं विद्धि; यः (अम्बुवाहः) मन्द्रस्निग्धैः ध्वनिभिः अबलावेणिमोक्षोत्सुकानि पथि श्राम्यतां प्रोषितानां वृन्दानि त्वरयति ।

(१०१) अविधवे, अनेन तव भर्ता जीवतीत्युक्तम् । अविधवापदं कविसमये भ्रष्टमिति न मन्तव्यं तथा श्रीरामायणे प्रयोगात् ' ये मामाहुः पितुर्गेहे पुत्रिण्यविधवेति च ।' इति ...न केवलं मित्रमात्रमहं किंतु त्वत्समागमाय तस्य प्रेरकश्च भवामीत्यभिप्रायेणाह यो वृन्दानि त्वरयतीति ।...मन्द्रस्निग्धैः...इदं विशेषणम् उग्रगर्जितश्रवणे प्रोषितानां विनाशो मा भूदित्यभिप्रायेण प्रयुक्तम् । (द्व)

अविधवे...अनेन भर्तृजीवनसूचनादनिष्टागमशङ्कां निरस्यति । ...त्वरयति । पान्थोपकारिणो मे किमु वक्तव्यं सुहृदुपकारित्वमिति भावः । (म)

---

(101) Know me, a cloud, O one not a widow! [to be] the dear friend of [your] lord, come near you with his messages borne in the mind, [a cloud] who whips [or hastens] up on the way masses of tired travellers longing for the untying of the braids of [their] wives, by deep and agreeable rumblings.

---

१ प्रियमभिद्धे । २ तत्संदेशान्मनसि निहितादागतं...

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैव ।
श्रोष्यत्यस्मात्परमवहिता सौम्य सीमन्तिनीनां
कान्तोदन्तः सुहृदुपनतः संगमात्किंचिदूनः ॥ १०२ ॥

CONSTRUE : इति आख्याते पवनतनयं मैथिली इव सा उन्मुखी उत्कण्ठोच्छ्वसितहृदया त्वां वीक्ष्य संभाव्य च अस्मात् परम् अवहिता (सती) श्रोष्यति एव; हे सौम्य सीमन्तिनीनां सुहृदुपनतः कान्तोदन्तः संगमात् किंचित् ऊनः ।

(१०२) संगमात्किंचिदूनः । प्रियतमागमे समाश्वासोत्पादात् प्रियसंगमनिभ इत्यर्थः । (व)

संभाव्य चैव...अन्योऽयमिति न तूष्णीमास्ते, भर्तुर्मित्रमिति बुद्ध्वा सा निःशङ्क-मेव त्वां प्रेक्षिष्यते संभावयति चेत्यर्थं द्योतयितुमेवकारः प्रयुक्तः । (द)

अस्माद्भर्तृमैत्रीज्ञापनात्परं सर्वं...अत्र सीताहनूमदुपमानादस्याः पातिव्रत्यं मेघस्य दूतगुणसंपत्तिश्च व्यज्यते । ...सुहृदा सुहृन्मुखेनोपनतः ... सुहृत्पदं विप्रलम्भशङ्कानि-वारणार्थम् । ...किंचिदून ईषदूनस्तद्वदेवानन्दकारीत्यर्थः । (म)

तामायुष्मन्मम च वचनादात्मनश्चोपकर्तुं
ब्रूया एवं तव सहचरो रामगिर्याश्रमस्थः ।
अव्यापन्नः कुशलमबले पृच्छति त्वां नियुक्तः
पूर्वाशास्यं सुलभविपदां प्राणिनामेतदेव ॥ १०३ ॥

CONSTRUE : (हे) आयुष्मन्, मम वचनात् च आत्मनः उपकर्तुं च ताम् एवं ब्रूयाः— (हे) अबले, तव सहचरः रामगिर्याश्रमस्थः अव्यापन्नः नियुक्तः त्वां कुशलं पृच्छति; सुलभविपदां प्राणिनाम् एतद् एव पूर्वाशास्यम् ।

---

(102) This being told, like Sitā [Princess of Mithilā] looking up to Hanūmat [the son of Wind], she, with [her] heart palpitating through eagerness, beholding and [also] greeting you, would surely be, [being] attentive, listening to further than this; news about the husband come from a friend [is], O gentle one, for [or in the eyes of] ladies, just slightly less than [actual] union.

(103) Her, O long-lived one ! at my request [or, in my name] and also to oblige yourself, should you address thus— Your consort, staying at a hermitage on the Rāmagiri, not dead, fixed up [there] inquires, O weak one, after your welfare: for creatures easily meeting with calamities, this alone [is] the first thing to be wished for.

---

१ कान्तोपान्तात्सुहृदुपगमः...। २ तामायुष्मान्मम ...ब्रूयादेवं । ३ वियुक्तः पूर्वाभाष्यं ।

(१०३) आयुष्मानिति वचने कर्तृपदं न त्वामन्त्रणम् । ब्रूयादिति प्रथमपुरुषप्रयोगात् । (व)

आश्रमपदं तत्रापि तपस्विप्राय एव वर्तते इति द्योतयितुं प्रयुक्तम् ।...तव सहचर इत्यादि मन्मुखेनेदमाह इत्यन्तं वाक्यजातं मेघस्य वचनम् । अतःपरं श्यामास्वङ्गमित्यादिवचनं यक्षस्य चेति ।

आत्मनः स्वस्योपकर्तुं च । परोपकारेणात्मानं कृतार्थयितुमित्यर्थः । उपकारक्रियां प्रति कर्मत्वेऽपि तस्यानुकरोतीत्यादिवत्संबन्धमात्रविवक्षायामात्मन इति षष्ठी न विरुध्यते । ...तथा च । 'क्वचित्क्वचिद् द्वितीयादर्शनात्सर्वस्य तथा ' इति नाथवचनमनाथवचनमेव । (म)

अङ्गेनाङ्गं तनु च तनुना गाढतप्तेन तप्तं
सास्रेणास्रद्रुतमविरतोत्कण्ठमुत्कण्ठितेन ।
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती
संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥ १०४ ॥

CONSTRUE : दूरवर्ती विधिना वैरिणा रुद्धमार्गः तनुना गाढतप्तेन सास्रेण उत्कण्ठितेन समधिकतरोच्छ्वासिना अङ्गेन, तनु तप्तम् अस्रद्रुतम् अविरतोत्कण्ठम् उष्णोच्छ्वासं च अङ्गं तैः संकल्पैः विशति ।

(१०४) तनु च तनुनेति चार्थाभावात् प्रतनु तनुनेति पठनीयम् । (व)

तनु च तनुनेति चकारः प्रतिविशेषणमाख्यातसंबन्धं कर्तुं प्रयुक्तः । ...अविरतोत्कण्ठमुत्कण्ठितेन । आत्मधर्मा अप्युत्कण्ठादयः शरीरेऽपि प्रयुज्यन्ते । (द)

अत्र समानुरागित्वद्योतनाय नायकेन नायिकायाः स्वसमानावस्थत्वमुक्तम् । (म)

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्ता-
त्कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्ट-
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥ १०५ ॥

---

(104) With those [well-known] fancies, he staying at a distance, with [his] path obstructed by inimical fate, unites with [his] body, thin, greatly heated, full of tears, with longing produced, [and] breathing hotly and heavily, [your] body [which is] also thin, heated, wet with tears, having a ceaseless yearning, [and] heaving hotly.

(105) He, who indeed was eager to tell into the ear, in the presence of your [female] friends, what could be spoken out loudly [lit. in words], through the eager longing for the touch of [your] face, [now] gone beyond the reach of [your] ear, [and] not [to be] seen by [your] eyes, says to you through me [lit. my mouth] this [the following] the words in which are dictated [lit. arranged] by love-anguish [or longing].

---

१ प्रतनु तनुना । २ ...श्रुद्रुत । स्रद्रव । ३ तरोच्छ्वासिना । ४ लोचनानामगम्य- ।

CONSTRUE: यः (सहचरः) सखीनां पुरस्तात् ते आननस्पर्शलोभात् शब्दाख्येयम् अपि यत् कर्णे कथयितुं लोलः अभूत् किल, श्रवणविषयम् अतिक्रान्तः लोचनाभ्याम् अदृष्टः सः त्वाम् उत्कण्ठाविरचितपदम् इदं मन्मुखेन आह ।

(१०५) कर्णे कथनं हि तस्य त्वन्मुखस्पर्शसुखानुभवाय । (व)

शब्दाख्येयं निरर्थकमित्यर्थः । सखीनां पुरस्तादिति वचनं जनाकीर्णत्वान्निर्व्याजाननस्पर्शदौर्लभ्यादुक्तम् । (द)

श्यामास्वङ्गं चकितहरिणीप्रेक्षिते दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासा-
न्हन्तैकस्थं क्वचिदपि न ते चण्डि सादृश्यमस्ति ॥ १०६ ॥

CONSTRUE: श्यामासु अङ्गम्, चकितहरिणीप्रेक्षिते दृष्टिपातम्, शशिनि वक्त्रच्छायाम्, शिखिनां बर्हभारेषु केशान्, प्रतनुषु नदीवीचिषु भ्रूविलासान् उत्पश्यामि; हन्त, (हे) चण्डि, क्वचित् अपि एकस्थं ते सादृश्यं न अस्ति ।

(१०६) अतःपरं चतुर्भिः श्लोकैर्विरहिणां कामतन्त्रोक्तानि विरहिणीसदृशावलोकनचित्रकर्मस्वप्नसमागमतदङ्गस्पृष्टस्पर्शनानि चत्वारि विनोदनान्युक्तानीत्यनुसंधेयम् । यथा गुणपताकायां ' वियोगे चायोगे प्रियजनसदृक्षानुगमनं ततश्चित्रालोकं स्वपनसमये दर्शनमपि । तदङ्गस्पृष्टानामुपगतवतां स्पर्शनमिति प्रतीकारः कामव्यथितमनसां कोऽपि गदितः ॥ ' इति । तेषु प्रियासदृशावलोकनमाह ।... चण्डि, अत्यन्तकोपने । अनेनैकत्र सादृश्यं लब्धं चेद्भवति तदेवालं भवति किं मया कार्यमिति मह्यं मा कुप्य इति परिहासाभिप्रायेण प्रत्युक्तम् । (द)

हे चण्डि कोपने । ...उपमानकथनमात्रेण न कोपितव्योमिति भावः । ...अनेनास्याः सौन्दर्यमनुपममिति व्यज्यते । (म)

---

(106) [Your] physical frame in the Śyāmā creepers, glance in the look of the frightened female deer, face-charm in the moon, tresses in the abundant plumage of the peacocks, playful movements of the eyebrows in the very slender ripples of the river, I fancy; [but] alas! there is nowhere at all, O dear [or angry] one, resemblance to you existing in one place!

---

१ प्रेक्षणे । २ भ्रूपताकां ।

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ॥ १०७ ॥

CONSTRUE: प्रणयकुपितां त्वां धातुरागैः शिलायाम् आलिख्य आत्मानं ते चरणपतितं कर्तुं यावत् इच्छामि तावत् मुहुः उपचितैः अस्रैः मे दृष्टिः आलुप्यते; क्रूरः कृतान्तः तस्मिन् अपि नौ संगमं न सहते ।

(१०७) चित्रदर्शनमाह । (द)

संप्रति प्रतिकृतिदर्शनमाह...संगमलेखनमप्यावयोरसहमानं दैवमावयोः संगं न सहते इति किमु वक्तव्यमित्यपिशब्दार्थः । (म)

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥ १०८ ॥

CONSTRUE: स्वप्नसंदर्शनेषु मया कथम् अपि लब्धायाः ते निर्दयाश्लेषहेतोः आकाशप्रणिहितभुजं मां पश्यन्तीनां स्थलीदेवतानां मुक्तास्थूलाः अश्रुलेशाः तरुकिसलयेषु बहुशः न पतन्ति (इति) न खलु ।

(१०८) स्वप्नसमागममाह । ...तरुकिसलयेषु, इदं पतितानामश्रुलेशानां प्रकाशनाय प्रयुक्तम् । ...अन्ये तु पश्यन्तीनां तुहिनकणिकाच्छद्मना देवतानामिति पाठमादृत्य व्याचक्षते । इदं रसावहं न भवति । कामार्तस्य तत्त्वं विहाय व्याजबाष्पमोचनवर्णनस्यायुक्तत्वात् । (द)

अधुना स्वप्नदर्शनमाह...तरुकिसलयेषु । अनेन चेलाञ्चलेनाश्रुधारणसमाधिर्व्यन्यते । ...' महात्मगुरुदेवानामश्रुपातः क्षितौ यदि । देशभ्रंशो महादुःखं मरणं च भवेद्ध्रुवम् ॥ ' इति क्षितौ देवताश्रुपातनिषेधदर्शनाद्यक्षस्य मरणाभावसूचनार्थं तरुकिसलयेषु पतन्तीत्युक्तम् । (म)

---

(107) The moment I desire to make myself [in the picture] prostrate at your feet, having painted you angry through love on the slab of stone, by means of mineral dyes, my eye-sight is all obscured by tears gathered up again and again; merciless Fate does not bear up our union even there [in the picture] !

(108) Not indeed do not tear-drops big like pearls fall abundantly on the tree-shoots, of the Deities of the natural sites, seeing me stretching forth [my] arms in the sky, for the purpose of mercilessly embracing you secured by me with great difficulty in dream-visions.

---

१ रालिप्यते । २ सति ।

भित्त्वा सद्यः किसलयपुटान्देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः।
आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः।
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ १०९ ॥

CONSTRUE: देवदारुद्रुमाणां किसलयपुटान् सद्यः भित्त्वा तत्क्षीरस्रुति-सुरभयः ये दक्षिणेन प्रवृत्ताः ते तुषाराद्रिवाताः (हे) गुणवति, पूर्वम् एभिः तव अङ्गं स्पृष्टं भवेत् यदि किल इति मया आलिङ्ग्यन्ते।

(१०९) तदङ्गस्पृष्टस्पर्शनमाह...गुणवति, गुणः शरीरस्य हृद्यः स्पर्शगुणो विवक्षितः। ...अस्यार्थस्य मूलं 'वाहि वात यतः कान्ता तां स्पृष्ट्वा मामपि स्पृश।' इति श्रीरामायणवचनम्। (दृ)

इदानीं तदङ्गस्पृष्टवस्तुदर्शनमाह...हे गुणवति सौशील्यसौकुमार्यादिगुणसंपन्ने। ... अत्र वायूनां स्पृश्यत्वेऽप्यमूर्तत्वेनालिङ्गनायोगादालिङ्ग्यन्त इत्यभिधानं यक्षस्योन्मत्तत्वात् प्रलपितमित्यदोष इति वदन्निरुक्तकारः स्वयमेवोन्मत्तप्रलापीत्युपेक्षणीयः। (म)

संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात्।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्णाभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥ ११० ॥

CONSTRUE : दीर्घयामा त्रियामा कथं क्षणः इव संक्षिप्येत? अहः अपि सर्वासु अवस्थासु कथं मन्दमन्दातपं स्यात्? (हे) चटुलनयने, इत्थं दुर्लभप्रार्थनं मे चेतः गाढोष्णाभिः त्वद्वियोगव्यथाभिः अशरणं कृतम्।

(११०) एतच्च दुर्लभम्। न हि निखिला क्षणदा क्षणवत्क्षीयते। न च दिनं सर्वदा मन्दातपं भवति। (व)

गाढोष्णाभिः, अनेन दिवसस्य मन्दातपस्य विघातो विवक्षितः। ...त्वद्वियोग... अनेन त्रियामासंक्षेपप्रतिबन्धो विवक्षितः। (दृ)

सर्वास्ववस्थासु, सर्वकालेष्वित्यर्थः। (म)

---

(109) O meritorious [or, attractive] one, by me are embraced those breezes from the Himālaya [snow-mountain], which having split up straightaway the shoot-folds of the Devadāru trees start moving on in the southernly direction, thinking (*iti*) that very possibly your body might have been touched previously by these!

(110) How could the night with [its] long watch-periods, be compressed into a moment as it were? How could the day too have very moderate heat in all periods [or, seasons]? —My mind, O unsteady-eyed one, thus having [or entertaining] desires difficult to obtain, is made helpless by agonies due to separation from you, full of intense heat.

---

१ पूर्वस्पृष्टं। २ संक्षिप्येरन्क्षण...दीर्घयामास्त्रियामाः। ३ गाढोष्माभिः।

नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम् ।
कस्यैकान्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ १११ ॥

CONSTRUE : ननु बहु विगणयन् आत्मानम् आत्मना एव अवलम्बे,तत् (हे) कल्याणि, त्वम् अपि नितरां कातरत्वं मा गमः; कस्य एकान्तं सुखम् उपनतम् एकान्ततः दुःखं वा ? दशा चक्रनेमिक्रमेण नीचैः उपरि च गच्छति ।

(१११) तदुक्तम् । सुखं च दुःखं च भवाभवौ च लाभालाभौ मरणं जीवितं च। पर्यायशः सर्वमिह स्पृशन्ति तस्माद्धीरो न प्रहृष्येन्न शोचेत् ॥ (व)

इदानीं स्वशोकावस्थाकर्णनेन सा दुःखिता भविष्यतीत्याशङ्क्य तामाश्वासयति। ... आत्मना स्वयमेव। अवलम्बे धारयामि । ...अस्य मूलं 'दुष्करं कुरुते रामो हीनो यद्-नया प्रभुः। धारयत्यात्मनो देहं न शोकेनावसीदति' ॥ इति श्रीरामायणवचनम् । (द)

न च मदीयदुर्दशाश्रवणाद्भेतव्यमित्याह...अवलम्बे धारयामि यथाकथंचिज्जी-वामीत्यर्थः । ...हे कल्याणि सुभगे । त्वत्सौभाग्येनैव जीवामीति भावः। (म)

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
मासानन्यान्गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगणितं तं तमेवाभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ ११२ ॥

CONSTRUE : शार्ङ्गपाणौ भुजगशयनात् उत्थिते मे शापान्तः, अन्यान् चतुरः मासान् लोचने मीलयित्वा गमय; पश्चात् आवां विरहगणितं तं तम् एव अभिलाषं परिणतशरच्चन्द्रिकासु क्षपासु निर्वेक्ष्यावः ।

---

(111) I say, thinking much of myself I do [continue to] stand by myself; so, O auspicious one, do not on your part (*api*) be excessively nervous. For whom is unending happiness brought up or unalloyed misery for the matter of that ? [One's] state goes down and up after the manner of the felly of a wheel.

(112) [There would be] the end of my curse when Viṣṇu [the wielder of the Sārṅga bow] gets up from [his] serpent-bed; pass four more (*anyān*) months, closing [your] eyes [that is, suffering with patience]; thereafter we two would enjoy during the nights with the mature autumnal moon-light, those self-same various desires [of ours] thought of [lit. counted] during separation [period].

---

१ न त्वात्मानं...त्मना नावलम्बे । ...कस्यात्यन्तं । २ शेपान्मासान्गमय । ३ विरहगुणितं। ४ तमात्माभिलाषं।

(११२) लोचननिमीलनेनात्र यथातथात्वं लक्ष्यते। (व)

कदा कल्याणमावयोर्भविष्यतीत्यपेक्षायामाह...भुजगशयनादुत्थिते...कौर्मे पुराणे-'क्षीराब्धौ शेषपर्यङ्क आषाढ्यां संविशेद्धरिः। निद्रां त्यजति कार्तिक्यां तयोः संपूजयेद्धरिम्॥' ...ननु आषाढश्रावणौ प्रावृट्। ततः परं शरदिति प्रसिद्धम्। तस्मात् कथमाषाढात् प्रभृति मासचतुष्टयात् परः शरत्काल इत्युक्तम्। उच्यते। ऋतूनां कल्पना द्विधा। केचित् षड्ऋतव इति वदन्ति। अपरे त्रय इति। अत्र तावद् ऋतुत्रयपक्षाश्रयेणोक्तम्। तथा श्रीरामायणे-'चत्वारो वार्षिकाः प्रोक्ता गता वर्षशतोपमाः।' इति। लोचने मीलयित्वेति वचनं लोकोक्तिच्छाययोक्तम्। (द)

न च निरवधिकमेतद्दुःखमित्याह।...चतुरो मासान् मेघदर्शनप्रभृति हरिबोधनदिनान्तमित्यर्थः। दशदिवसाधिक्यं त्वत्र न विवक्षितमित्युक्तमेव। लोचने मीलयित्वा ... धैर्येणातिवाहयेत्यर्थः। ...अत्र कैश्चित् 'नभोनभस्ययोरेव वार्षिकत्वात्कथमाषाढादिचतुष्टयस्य वार्षिकत्वमुक्तमिति चोदयित्वर्तुत्रयपक्षाश्रयणादविरोधः' इति पर्यहारि तत्सर्वमसंगतम्। अत्र गतशेषाश्चत्वारो मासा इत्युक्तं कविना न तु ते वार्षिका इति। तस्मादनुक्तोपालम्भ एव। यच्च नाथेनोक्तम् 'कथमाषाढादिचतुष्टयात्परं शरत्कालः' इति तत्राप्याकार्तिकसमाप्तेः शरत्कालानुवृत्तेः परिणतशरच्चन्द्रिकास्वित्युक्तम्। न तु तदैव शरत्प्रादुर्भाव उक्त इत्यविरोध एव। (म)

भूयश्चाह त्वमसि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा।
सान्तर्हासं कथितमसकृत्पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव रमयन्कामपि त्वं मयेति॥ ११३॥

CONSTRUE: भूयः च आह -- पुरा शयने मे कण्ठलग्ना त्वम् असि, निद्रां गत्वा किम् अपि सस्वरं रुदती विप्रबुद्धा; असकृत् पृच्छतः मे (हे) कितव, त्वं काम् अपि रमयन् मया स्वप्ने दृष्टः इति त्वया सान्तर्हासं कथितं च।

(११३) इदानीं सुस्पष्टमभिज्ञानमाह। (व)

सर्वमिदं वञ्चकवचनमिव प्रतिभाति। मया ज्ञातपूर्वं किमपि लक्षणं वदेत्याशङ्क्याह। (द)

संप्रति तस्या मेघे वञ्चकत्वशङ्कानिरासायातिगूढमभिज्ञानमुपदिशति। (म)

---

(113) Further says he :—Once [or, formerly] you clinging to my neck lay on the bed; having fallen asleep, you became awake, loudly crying for some reason or other; to me asking repeatedly, was told by you laughing inwardly—'Rogue, you were seen by me in dream flirting with some [woman]!'

---

१ त्वमपि। २ पृच्छतोऽसि।

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनादसितनयने मय्यविश्वासिनी भूः।
स्नेहानाहुः किमपि विरहे ह्रासिनस्ते ह्यभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ ११४ ॥

CONSTRUE : एतस्मात् अभिज्ञानदानात् मां कुशलिनं विदित्वा (हे) असितनयने, कौलीनात् मयि अविश्वासिनी मा भूः; किम् अपि विरहे स्नेहान् ह्रासिनः आहुः, ते हि अभोगात् इष्टे वस्तुनि उपचितरसाः प्रेमराशीभवन्ति।

(११४) कौलीनात् लोकवादात्, एतावता कालेन तव भर्ता परासुः स्यान्नो चेदागमिष्यतीति जनवादादित्यर्थः।...किमपि किंचिदतितुच्छमित्यर्थः। (द्व)
स्नेहप्रेम्णोरवस्थाभेदाद्भेदः। (म)

[आश्वास्यैवं प्रथमविरहे शोकदष्टां सखीं ते
तस्मादद्रेस्त्रिनयनवृषोत्खातकूटान्निवृत्तः।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥ ११५ ॥]

CONSTRUE : प्रथमविरहे शोकदष्टाम् ते सखीम् एवम् आश्वास्य त्रिनयनवृषोत्खातकूटात् तस्मात् अद्रेः निवृत्तः (सन्) साभिज्ञानप्रहितकुशलैः तद्वचोभिः मम अपि प्रातःकुन्दप्रसवशिथिलम् जीवितं धारयेथाः।

(११५) इत्थं स्वकुशलं संदिश्य तत्कुशलसंदेशानयनमिदानीं याचते। (म)

कच्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ ११६ ॥

---

(114) Having known me to be doing well from this presentation of a token, do not be, O black-eyed one, distrustful towards me, from [or, on the strength of some] scandalous rumours. They somehow talk [loosely] of affections deteriorating [or dying out] during separation; on the other hand (*hi*) they, with the flavour heightened in respect of beloved [or, desired] objects, are turned into heaps of love.

[(115) Having thus comforted your friend stung with grief at the first separation, turning back from that mountain the peaks of which are dug up by the Bull of Siva [the three-eyed one], you should prop up, by her words sending forth welfare-news along with tokens, the life of me also, [which is] enfeebled like a Kunda flower in the morning.]

(116) I hope this friendly service to me, O gentle one, has been resolved upon by you; not indeed do I consider your stiffness as due to repudiation [of my request]; begged of by the Cātakas, you send water [to them], even though void of sound; of the good, a reply to the suppliants [is] the execution of the desired business itself.

---

१ प्रथमविरहोदग्रशोकां ...ते शैलादाशु त्रिनयन... २ साभिज्ञानं प्रहितवचनैस्तत्र युक्तैर्ममापि। ३ प्रत्याख्यातुं न खलु।

CONSTRUE : (हे) सौम्य, इदं मे बन्धुकृत्यं त्वया व्यवसितं कच्चित्, प्रत्यादेशात् भवतः धीरतां न खलु कल्पयामि; याचितः निःशब्दः अपि चातकेभ्यः जलं प्रदिशसि; सतां हि प्रणयिषु ईप्सितार्थक्रिया एव प्रत्युक्तम्।

(११६) इत्थं संदेशमुक्त्वा प्रार्थनामभ्युपगमयितुमाह। ... महान्तो हि कर्मणा ब्रुवन्ति न वचसा। (व)

इदानीं मेघं स्तौति। ...यद्यपि प्रत्यादेशशब्दः प्रत्याख्यानवचनः, तथाऽप्यत्र प्रतिवचनवाचको भवति प्रत्युक्तमिति वक्ष्यमाणत्वात्। ...निःशब्दोऽपीति, अनेन निरुत्तरत्वं विवक्षितम्। (द)

संप्रति मेघस्य प्रार्थनाङ्गीकारं प्रश्नपूर्वकं कल्पयति... क्रिया केवलमुत्तरमित्यर्थः]
(म)

एतत्कृत्वा प्रियमनुचितं[1] प्रार्थनादात्मनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या।
इष्टान्देशान्विचर जलद प्रावृषा संभृतश्री-
र्मा भूदेवं[2] क्षणमपि सखे विद्युता विप्रयोगः ॥ ११७ ॥

CONSTRUE : (हे) जलद, सौहार्दात् वा विधुरः इति मयि अनुक्रोशबुद्ध्या वा मे प्रार्थनात् आत्मनः अनुचितम् एतत् प्रियं कृत्वा प्रावृषा संभृतश्रीः इष्टान् देशान् विचर; (हे) सखे, एवं क्षणम् अपि विद्युता विप्रयोगः मा भूत्।

(११७) सौहार्दाद् वा एतावन्तं कालमाभाषणादिजनितात् सुहृद्भावादित्यर्थः। उक्तं च–' संबन्धमाभाषणपूर्वमाहुः ' इति। ...प्रावृषा संभृतश्रीः ...अयमत्र समाधिः– कश्चित् पथिको देशान्तराणि गच्छन् कयापि दास्या संभृतार्थो भवतीति। एवं मम वियोगप्रकारेण। ...देशान्तरगमनात् पथिकायमानस्य भवतः क्षणमपि मम कान्तयेव विद्युता विप्रयोगो मा भूदित्यभिप्रायः। (द)

संप्रति स्वापराधसमाधानपूर्वकं स्वकार्यस्यावश्यंकरणं प्रार्थयमानो मेघं विसृजति।... ' अन्ते काव्यस्य नित्यत्वात्कुर्यादाशिषमुत्तमाम्। सर्वत्र व्याप्तये विद्वान्नायकेच्छानुरूपिणीम् ' इति सारस्वतालंकारे दर्शनात्काव्यान्ते नायकेच्छानुरूपोऽयमाशीर्वादः प्रयुक्त इत्यनुसंधेयम्। (म)

---

(117) Having shown [or done] this favour —unfair to you—[to me] at my request, either through good-heartedness or through a feeling of pity towards me because (*iti*) [I am] separated [from my wife], roam about, O cloud, over desired regions, with [your] splendour increased by the rainy reason; may there not be even for a moment, O friend, separation [of you] from the lightning thus [as in my case] !

---

१ ...मनुचितप्रार्थनावर्त्मनो मे। २ च ते।

Notes

The poem is called Meghadūta or sometimes Meghasaṁdeśa. मेघश्चासौ दूतश्च मेघदूतः, then metaphorically a work describing the cloud as a messenger (मेघदूतः thus really becomes a विशेषण to काव्य, but by अभेदोपचार, it means the काव्य itself).

(1) स्वाधिकारात् प्रमत्तः—According to some commentators, the Yaksa failed to bring fresh flowers for Kubera's use one day. Others say that he was in charge of the garden of Kubera and through carelessness allowed Indra's elephant to trample down the flower-beds. छायातरुषु—छायाप्रचुराः तरवः येषु. Malli. explains छायातरु as नमेरुवृक्ष. रामगिरि—identified with रामटेक near Nagpur or with the Ramagarh hill in Central Provinces. The poem opens without a मङ्गलश्लोक. A commentator points out that there is मङ्गलार्थ in the verse as the letter क in the first word कश्चित् means 'Prajapati.' It would be seen that the poet does not mention the name of the Yakṣa in the poem ; this is defended by one commentator on the authority, भर्तुराज्ञां न कुर्वन्ति ये च विश्वासघातकाः । तेषां नामापि न ग्राह्यं शास्त्रस्यादौ विशेषतः ॥ कान्तायाः विरहेण गुरुणा—The Yakṣa naturally would not have minded the curse very much, if he had been allowed to take his wife along with him in exile. स्वाधिकारविषये प्रमत्तः, there is no doubt that स्वाधिकारप्रमत्त is the genuine reading. Dakṣiṇāvarta calls this compound कृच्छ्रलभ्य (why this should be so is not clear) and reads स्वाधिकारात् प्रमत्तः. D. rightly points out that the expressions जनकतनया, रामगिरि etc. show that the poet is indebted to the Rāmāyaṇa. रामगिर्याश्रमेषु-the plural आश्रमेषु shows that the Yakṣa owing to great mental trouble, changed his residence now and then by way of trying to secure peace of mind. The reference to जनकतनया (and not राम) shows that the शृङ्गाररस is given prominence, according to Vallabha.

(2) कनकस्य वलयः तस्य भ्रंशेन रिक्तः प्रकोष्ठः यस्य. The slipping of the bracelet was due to the great emaciation brought on by the separation from his wife. Cf. अनतिलुलितज्याघाताङ्कं मुहुर्मणिबन्धनात् कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते ॥ Śāk. III. वप्रक्रीडासु (the sport of battering against a rampart, indulged in by elephants) परिणतः गजः इव प्रेक्षणीयः तम्. परिणत is used here in the sense of तिर्यग्दन्तप्रहारवान्.

This is a happy conceit. The curse of the Yakṣa was to end on the 11th day of the first half of Kārtika as stated in the verse शापान्तो मे etc. (112) which also states that only four months had remained for the curse to end. The poem thus opens when the Yakṣa had passed about eight months on the Rāmagiri. The reading प्रथमदिवसे is attacked on the ground that the period from the 1st day of Āṣāḍha (about the end of June) to the day of the end of the curse covers not four months, but *four months and ten days*, and that verse 4 speaks of the month of Śrāvaṇa being near (प्रत्यासन्ने नभसि which becomes meaningless if full one month was to elapse before Āṣāḍha would run its course). Some prefer therefore the reading प्रशमदिवसे (on the last day), but this does not mend matters either, as in that case the period of the curse still to be passed would be three months and eleven days and not four months. It is obvious that the poet does not want to show himself up as a mathematician. He describes things as a poet. Again it is more in the fitness of things that the Yakṣa should be moved by the appearance of the *first* cloud which makes its appearance on the Nagpur side आषाढस्य प्रथमदिवसे and not प्रशमदिवसे. D. points out that मत्तगजदर्शन is a good omen. Vallabha's contention that प्रथमदिवसे should be preferred as वर्षाकाल is प्रस्तुत here is hardly convincing.

(3) कौतुक is कामविषयौत्सुक्यम्. राजराजः (राज्ञां राजा)—an epithet of Kubera. अन्तर्बाष्पः=अन्तःस्तम्भितबाष्पः, सुखिनः that is, united with one's beloved. The sight of clouds is a great excitant of love. D. condemns the reading केतकाधानहेतोः as an अश्लाघ्यविशेषण. There is nothing अश्लाघ्य about it, but there is no special propriety in mentioning the केतक The Yakṣa was not a प्राकृत person, so he was able to restrain his feelings and did not shed tears.

(4) Dakṣiṇāvarta reads प्रत्यासन्ने मनसि (when his mind had been composed; in the last verse the Yakṣa is described as having been greatly excited). दयिता...नार्थी would go with सः. प्रत्यासन्ने मनसि makes the expression प्रीतः more or less superfluous. नभस् is the month of Śrāvaṇa when rain falls in abundance. The Yakṣa is desirous of sending a message which would reach his wife before Śrāvaṇa sets in, as love-excitement would be at its highest in that month. It would perhaps be better to take प्रत्यासन्ने नभसि not as a loc. absl. construction, but as an ordinary locative (in the month of Śrāvaṇa near at hand). जीमूत (जीवनस्य उदकस्य मूतः

पटबन्धः) a cloud, the expression is significant as the cloud is most fitted to give जीवन (life). अर्घ—a respectful offering offered to guests. आपः क्षीरं कुशाग्राणि दधि सर्पिश्च तण्डुलाः। यवाः सिद्धार्थकं चैव अष्टाङ्गोऽर्घः प्रकीर्तितः ॥ also रक्तविल्वाक्षतैः पुष्पैर्दधिदूर्वाकुशैस्तिलैः। सामान्यः सर्वदेवानामर्घोऽयं परिकीर्तितः ॥ प्रीतिप्रमुखानि वचनानि यस्मिन् कर्मणि तत् प्रीतिप्रमुखवचनं यथा तथा (going with व्याजहार), or the expression might be taken as an adjective to स्वागतम्.

(5) The use of क—क shows that there is a great incongruity between two sets of objects, and constitutes the figure of speech विषम. A messenger must be an intelligent person, and endowed with sound limbs as well; but a cloud is a heterogeneous compound of vapour, heat etc., lacking intelligence or consciousness. But the Yakṣa, mad with love, was incapable of understanding this distinction. Dakṣiṇāvarta reads संदेशार्थः प्रापणीयाः for संदेशार्थाः प्रापणीयाः and प्रणयकृपणाः (incapable of understanding to whom they should prefer their request) for प्रकृतिकृपणाः. The plural संदेशार्थाः makes the contrast (between धूमः and संदेशार्थाः) more forcible. प्रणयकृपणाः is more in harmony with the प्रस्तुत topic, for the Yakṣa was thinking of actually preferring a request to an object having no organs of sense or life in the accepted sense. But प्रकृतिकृपणाः is wider in its application and if we consider the description of Purūravas (in the Vikramorvaśīya, Act IV) as embracing a creeper, we are inclined to think that प्रकृतिकृपणाः is the genuine reading. Again, the next verse uses the expression प्रकृतिपुरुष which was probably suggested by प्रकृतिकृपणाः. Instead of चेतनाचेतनेषु, the poet ought to have written अचेतनेष्वपि. Dakṣiṇāvarta justifies the expression चेतनाचेतनेषु, arguing that both चेतन and अचेतन objects are mentioned because they are referred to in the first half of the verse (अचेतन in the first line and चेतन in the second). गुह्यक (निधिं गूहते इति) is the same as यक्ष. It is also an epithet of Kubera, and is then secondarily applied to a servant of Kubera.

(6) Mallinātha explains पुष्करावर्तक as पुष्कराश्च आवर्तकाश्च केचिन्मेघानां श्रेष्ठाः, Dakṣiṇāvarta says कूटस्थाः केचन मेघाः. These huge clouds make their appearance at the time of Kalpa. मघवन् (the giftgiver or the lord of riches), an epithet of Indra. प्रकृतिपुरुषम्-अमात्यादिप्रकृतिवर्गस्थं पुरुषम् one of the ministers. कामरूपम् capable of taking any shape and thus able to traverse rivers, mountains etc.

very easily. The Yakṣa means to say that the cloud was an ideal messenger ; he was born of a noble family, he was likewise in the secrets of Indra and thus could be trusted to discharge his duty properly and as he was able to change his form at will, nothing would hamper his progress on the way. The Yakṣa flatters the cloud in the first two lines, to keep him in good humour. दूरबन्धुः—बन्धु here means 'a wife.' विधिवशात् is to be construed with दूरबन्धुः, it might go with अर्थित्वं गतः. The last line is a proverbial quotation. वन्ध्या is Vallabha's reading. Verse 11 below has the expression अवन्ध्याम्, so वन्ध्या, rather than मोघा, appears to be genuine.

(7) The Yakṣa points out that he is not at all making an unreasonable request to the cloud ; in fact, it is quite in line with the function of the cloud, which is to relieve the distress of those oppressed with the heat of the sun or love. धनपतेः (कुबेरस्य) क्रोधेन विश्लेषितस्य, this is put in for the purpose of arousing sympathy in the cloud's mind. यक्षेश्वराणाम् means यक्षमुख्यानाम् or of the lord of Yakṣas (the plural being used बहुमानार्थे). बाह्ये उद्याने स्थितस्य हरस्य शिरसि या चन्द्रिका (crescent moon) तया धौतानि हर्म्याणि यस्यां सा. Śiva may be occasionally residing in the garden outside Alakā or a permanent form of Śiva might be supposed to be residing there. According to Vallabha, the propriety of the expression is that Alakā enjoyed moon-light even during the day.

(8) पवनपदवी–the sky, the path of air. The Yakṣa says that in case the cloud accepts his mission, he would have the additional satisfaction of relieving the distress of other persons as well. उद्गृहीतालकान्ताः–because the ladies, being separated from their husbands, had allowed their hair to remain dishevelled, no toilet of any kind being indulged in by a प्रोषितभर्तृका (क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम्। हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ॥). In order to look properly at the cloud, it would be necessary to hold away the curly hair hanging on the cheeks and the face. प्रत्ययादाश्वसत्यः (Dakṣiṇāvarta notices the reading आश्वसन्त्यः and says that some mistakenly regard आश्वसत्यः as ungrammatical and so आश्वसत्यः need not be changed into आश्वसन्त्यः) consoled by the confidence in the return of their beloved (प्रत्यय=प्रियागमनविश्वास) when the rainy season sets in. विधुर distressed. अयं जनः refers to the speaker, अहम्. The Yakṣa means to say that

not all persons are as unfortunate as himself, unable to act according to their wishes. Others at any rate would be doing full justice to the advent of the cloud. Dakṣiṇāvarta explains अन्योऽपि as ममासदृशोऽपि पृथग्जनोऽपीत्यर्थः। Vallabha alternatively suggests that अन्यः जनः may be construed with जायामुपेक्षेत, which would make the construction unnecessarily complex.

(9) There is some confusion as regards the order of Verses 9–12. We have followed the order as given by Dakṣiṇāvarta. Vallabha reads आपृच्छस्व etc. (Verse 12) as Verse 9, retaining the order of the other verses. It appears however that to ask the cloud to take leave of his friend, at this stage, is certainly quite abrupt. Mallinātha reads तां चावश्यं etc. (Verse 10) as Verse 9 and मन्दं मन्दं as Verse 10. Vallabha reads तोयगृध्नुः (greedy of water) which more correctly describes the चातक (who is said to take only rain-water) than सगन्धः (belonging to the same class, a relative, cf. सर्वः सगन्धेषु विश्वसिति Śāk. V). तोयगृध्नु being a more difficult reading is likely to be the genuine one. क्षण means उत्सव, happiness, or momentary. Mallinātha remarks on the verse, निमित्तान्यपि ते शुभानि दृश्यन्त इत्याह, while Dakṣiṇāvarta says अनया निमित्तगत्या मत्प्रियादर्शनात् प्रागेव भवतः प्रियजनसंगमो भविष्यतीत्याह । यथा=यस्मात्. (सदृशम्, भाविफलानुरूपम् Mallinātha). A favourable wind is a good omen (cf. पवनस्यानुकूलत्वात प्रार्थनासिद्धिशंसिनः। Raghu I); so also the position of the Cātaka on one's left. सगन्धः means 'friend or relation' or सगर्वः. Dakṣiṇāvarta reads गर्भाधानक्षमपरिचयात्. क्षमपरिचय—familiarity calculated to ensure गर्भाधान. नयनसुभगं goes with भवन्तम् (this would be flattering to the cloud directly), while the reading नयनसुभगाः would go with बलाकाः. The बलाकाs suggest the picture of beautiful women, with garlands in their hands, waiting to receive the lover. The delight of the बलाकाs at the advent of the cloud is constantly referred to in Sanskrit literature.

(10) The Yakṣa says that however distressed his wife might be, he does not expect her to die, fortified as she is with the hope of reunion after the end of the curse. Dakṣiṇāvarta very clearly brings out the significance of the expressions एकपत्नीम् etc. कुसुमसदृशप्राण—प्राण means 'strength.' Mallinātha read. कुसुमसदृशं प्रायशो ह्यङ्गनानाम्. Cf. for the idea in the last two lines आशातन्तुर्न च कथयतात्यन्तमुच्छेदनीयः प्राणत्राणं कथमपि करोत्यायताक्ष्याः स एक. Mālatī IX. रुणद्धि obstructs, sustains. हृदय used in the sense of जीवित

